| | | |
|---|---|---|
| **मुदा** | – | मोद सहितम्। |
| **दीनलोकमोषणम्** | – | दीनानां लोकानां च मोषणं न भवेत्। |
| **हिंसनम्** | – | हिंसा। |
| **वंचनम्** | – | छलं, कपटम्। |
| **हितैषितैव** | – | हितस्य इच्छा एव। |
| **प्रवर्धताम्** | – | वृद्धिं प्राप्नोतु। |
| **अकण्टकम्** | – | कण्टकेन रहितम् भवतु। |
| **धीयताम्** | – | धारयतु। |
| **संस्कृतेर्विभूषणम्** | – | संस्कृत्याः आभूषणम्। |
| **वीतकल्मषम्** | – | निर्मलम्। |
| **लोकशासनम्** | – | लोकानां, प्रजानां शासनम्। |
| **भवेदभीतिकाननम्** | – | भयरहितं काननं, वनमिव भवेत्। |

## अभ्यासः

### वस्तुनिष्ठात्मक-प्रश्नाः–

**प्र. १.** सुदर्शना, सुवत्सला का कथिता ?

(क) प्रदेशभूः (ख) मातृभूः

(ग) माता (घ) स्वसृ ( )

**प्र. २.** पाठानुसारेण किं वर्तताम् ?

(क) सुराष्ट्रकम् (ख) हितैषितैव

(ग) सदाचरणम् (घ) लोकशासनम् ( )

**प्र. ३.** समस्त-सम्प्रदाय-भूषणम् किं नु भवेत् ?

(क) मनुष्यता (ख) सदाशयता

(ग) भ्रष्टता (घ) बन्धुता ( )

**प्र. ४.** 'शस्त्रिणां महाव्रतं किं अस्ति ?

(क) रक्तमण्डनं (ख) दीनलोकमोषणं

(ग) शान्ति-खण्डनं (घ) विपन्नरक्षणं ( )

**प्र.५. रिक्तस्थानपूर्तिः क्रियताम्–**

(क) समृद्धि–बुद्धि–शक्तिदा ........................................................................ ।।

(ख) ....................................................... क्षणेन लीयताम्।

(ग) न दीनलोकमोषणं .......................................................................न शोषणम् ।।

(घ) धीयतां .................................................................... विधीयताम्।

## अतिलघूत्तरात्मक–प्रश्नाः–

प्र.१. मातृवन्दना कीदृशेन स्वरेण गीयताम् ?

प्र.२. कस्य दूषणं न भवेत् ?

प्र.३. कस्य मोषणं न भवितव्यम् ?

प्र.४. लोकशासनं कीदृशं विधीयताम् ?

## लघूत्तरात्मक–प्रश्नाः –

प्र.१. मातृभूः विशेषणानां वर्णनं कुरुत।

प्र.२. संस्कृतेः किं विभूषणम् ?

प्र.३. शस्त्रिणां महाव्रतं किं अस्ति ?

## निबन्धात्मक–प्रश्नाः–

प्र.१. मातृभूमेः स्वरूपवर्णनम् कुरुत ।

प्र.२. सुराष्ट्रस्य लोकशासनस्य च किं अवधारणास्ति ?

प्र.३. संस्कृतेः संरक्षणाय किं कर्तव्यम् ?

## व्याकरणात्मक–प्रश्नाः–

**१. अधो–लिखितेषु पदेषु नामोल्लेखपुरस्सरसन्धिः कार्यः –**

| | | | सन्धिः | सन्धिनाम |
|---|---|---|---|---|
| (क) | एव + इति | = | .......................... | ............................ |
| (ख) | सन्निपत्य + अभियुक्तः | = | .......................... | ............................ |
| (ग) | कुतो +नु + एष | = | .......................... | ............................ |
| (घ) | निः + अनुक्रोशा | = | .......................... | ............................ |
| (ङ) | आर्यपुत्रस्य + उल्लापाः | = | .......................... | ............................ |

२. **अधो-निर्दिष्टानां सन्धिपदानां सन्धि-नाम-निर्देशपूर्वक-विच्छेदो विधेयः -**

| सन्धिपदम् | | विच्छेदः | सन्धिनाम |
|---|---|---|---|
| (क) हुतात्मभिः | = | .............................. | ........................... |
| (ख) भवेन्न | = | .............................. | ........................... |
| (ग) चैकता | = | .............................. | ........................... |
| (घ) संस्कृतेर्विभूषणं | = | .............................. | ........................... |
| (ङ) मातृभूरियम् | = | .............................. | ........................... |

३. **निम्नलिखितानां समस्तपदानां नाम-निर्देश-पुरस्सर-विग्रहो विधेयः -**

| समस्तपदम् | | विग्रहः | समासनाम |
|---|---|---|---|
| (क) दीनलोकमोषणम् | = | .............................. | ........................... |
| (ख) अकण्टकम् | = | .............................. | ........................... |
| (ग) वीतकल्मषम् | = | .............................. | ........................... |
| (घ) लोकशासनम् | = | .............................. | ........................... |
| (ङ) मातृवन्दना | = | .............................. | ........................... |

४. **अधोनिर्दिष्टेषु पदेषु शब्द-विभक्ति-वचन-निर्देशं कुरुत -**

| पदम् | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| (क) स्वरेण | ........................ | .................... | ..................... |
| (ख) दिक्षु | ........................ | .................... | ..................... |
| (ग) शस्त्रिणाम् | ........................ | .................... | ..................... |
| (घ) काननम् | ........................ | .................... | ..................... |
| (ङ) सुपर्णकैः | ........................ | .................... | ..................... |

५. **निम्नलिखितानां तिङन्तपदानां धातुः लकारः पुरुषः वचनञ्च पृथक् निर्दिश्यताम् -**

| तिङन्तपदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| (क) चीयताम् | ..................... | ............... | .................. | ................... |
| (ख) समाहृतम् | ..................... | ............... | .................. | ................... |
| (ग) वर्तताम् | ..................... | ............... | .................. | ................... |

(घ) प्रवर्धताम् ..................... ............... .................. ...................

(ङ) विधीयताम् ..................... ............... .................. ...................

(च) भवेत् ..................... ............... .................. ....................

६. **निम्नलिखितेषु पदेषु प्रकृतिः प्रत्ययश्च पृथक् लिख्यताम् -**

| पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|
| (क) समर्पितम् | ....................... | ........................... |
| (ख) रक्षणम् | ....................... | ........................... |
| (ग) वञ्चनम् | ....................... | ........................... |
| (घ) मनुष्यता | ....................... | ........................... |
| (ङ) भारतम् | ....................... | ........................... |

❀ ❀ ❀

# त्रयोदशः पाठः
# सङ्घे शक्तिः

प्रस्तुतः पाठः पं. नवलकिशोरकाङ्करेण विरचितः प्रबन्धमकरन्दात् समुद्धृतः। रचनाकारस्य जन्म १९१० तमे ईस्वीयेवर्षे जयपुरे अभवत्। शिक्षां गृहीतवता नवलकिशोरेण स्वकीयप्रतिभाबलाद् गद्य-पद्यरचनायां प्रावीण्यमधिगत। शास्त्रसर्वस्वम्, प्रबन्धामृतम्, प्रबन्धमकरन्दश्च इत्यादयः निबन्धसंग्रहाः संस्कृतसेविसमाजे सुतरां समादरणीयाः सन्ति। कविभूषणः, कविशिरोमणिः, विद्यावाचस्पतिः, महामहिमोपाध्यायः, गद्यसम्राट्-शास्त्रमार्तण्डेत्यादिभिरुपाधिभिरेते व्यूभूष्यन्त। १९८५ ई. वर्षे भारत-राष्ट्रपतिना सम्मानिताः इमे। एतेहि राष्ट्रीय-भावनानां प्रबलाः पोषकाः आसन्।

पाठेऽस्मिन् संगठनशक्तेः माहात्म्यं वर्णितमस्तिम्। धनधान्यसुसम्पन्नं स्वर्णरत्नमयाकरं राष्ट्रम् अपि सुसंहतिं विना विभवास्पदं न भवेद्। सुसङ्घटितजीवनम् एव राष्ट्रभावस्य कारणं भवति। लोके लोकसङ्घटनम् आततायिनां परिध्वंसने सुदर्शनचक्रवत् नूनम् आयुधमैश्वरम्।

ईशोपनिषदि अपि कथ्यते- '**सम्भूत्याम् अमृतमश्नुते**' अर्थात् संगठनेनैव अमृत-तत्त्वस्य प्राप्तिर्भवति। संगठनस्य महत्त्वस्य प्रतिपादनं कृत्वा डॉ. श्रीधर-भास्कर-वर्णेकरः कथयति -

**अपारभूमिविस्तारमगण्यजनसंकुलम्।**
**राष्ट्रं सङ्घटनाहीनं प्रभवेन्नात्मरक्षणे।।**
**विपत्सु वज्रधैर्याणां संग्रामेवज्रदेहिनाम्।**
**सङ्घो राष्ट्रविपत्काले सद्वज्रकवचायते।।**

नारायणपण्डितः हितोपदेशे कथ्यते-

**अल्पानामपिवस्तूनां संहतिः कार्यसाधिका।**
**तृणैर्गुणत्वमापन्नैः बध्यन्ते मत्तदन्तिनः।।**

पुरातनकाले कृतयुगे या शक्तिः मन्त्रप्रयोगे आसीत्, त्रेतायां या तन्त्रसाधने आसीत् द्वापरे च या व्यूहरचने आसीत्, सा हि शक्तिः कलौ सङ्घेः सङ्घीभूता। अतः साधूच्यते "**सङ्घे शक्तिः कलौ युगे**" -

स्वभावतः एव मानवाः सर्वत्र विजयं कामयन्ते, किन्तु विचारणीयोऽयं विचारो यत् कामनामात्रेण किं कश्चन स्वकर्मणि प्रयत्नं विना साफल्यं लभते ? शक्तिद्वारैव सर्वं कर्तुं शक्यते। माताऽपि तनयं रोदनं विना न स्तन्यं पाययति। जगति यो यावान् शक्तिमान् भवति स तावानेव समुन्नतेः शिखरमारोहति। शक्तिशाली हि देशोऽपरं हीनशक्तिकं देशमनयासेन स्वात्मसात् करोतीति प्रत्यक्षमेव सर्वेषां, शक्तिशून्यो मानवः स्वप्नेऽपि

शत्रुं जेतुं न पारयति। किं ज्वरादिरोगग्रस्तो जनः शक्तिमता सह युद्धे विजयं लप्स्यते ? नैव नैव, हेतुरत्र शक्तेरभाव एव। अतः प्रभविष्णुभिरस्माभिः जीवनं सुखेन यापयितुं शक्तिसंग्रहोऽवश्यं करणीयः।

इदमप्यवधेयं यत् का सा शक्तिः ? कथं च सा लभ्या ? कुत्र च तस्याः स्थानम् ? यस्या अभावेन लोका अवनतेर्गर्तमनुपतन्ति। कृते विचारे शक्तिपदेन बलमेव गृह्यते लोके। तद् बलं साम्प्रतं सङ्घे एव निवसति। अस्या एव बलस्वरूपायाः शक्तेः साम्प्रतमत्यावश्यकता वरीवर्ति। सा चेयं शक्तिः करालेऽस्मिन् महाकालकल्पे कलिकाले सङ्घटनद्वारैव प्राप्तुं शक्यते, उक्तञ्च – '**नान्यः पन्थाः विद्यतेऽयनाय**'। जातिः, व्यक्तिः, सामाजिकस्थितिः, किमन्यत् सम्पूर्णदेश एव सङ्घटनाद् हि स्व-सत्तां बिभर्ति। यत्र संघटनं तत्र सर्वसम्पत्तिः, यत्र च विघटनं तत्र सर्वविपत्तिरिति निश्चितम्। पाश्चात्यदेशानां चञ्चला चमत्कृतिमती प्रगतिः सङ्घटनाश्रितैवेति प्रत्यक्षं सर्वेषाम्।

परं हन्त हन्त ! अस्माकं दुर्दशानिदानस्य चिन्तनेनैव कम्पितं जायते चेतः। महत्कष्टमापतितं यदद्य भगवतः कृपया प्राप्तायामपि स्वतन्त्रतायां वयं नैतन्महत्त्वं जानीमः। अतीतं न स्मरामः स्वदेशस्य दयनीयां दशाञ्च न पश्यामः। प्रत्युत भयात्, मोहात्, अज्ञानाद्, अन्यस्माद् वा अलक्षितात् कारणाद् भीता इव सङ्घटनात्मिकां बुद्धिं दूरतस्त्यजामः, पवित्रात्मान इव न तां स्पृशामः, भूताविष्टा इव वा व्यर्थकोलाहलमाचरामः किन्तु निश्चप्रचमिदं यत् सङ्घटने सञ्जाते एवास्माकं देशः पूर्ववत् जगद्गुरुपदमलङ्करिष्यति। परिस्थितिं पश्यन्तो वयं यदा रागद्वेषादिकं विहाय सङ्घटनस्य महत्त्वं सम्यगभिनन्दिष्यामः तदैव वास्तविकं समुन्नतपदं प्राप्स्यामः। अत्र विषये स्वनामधन्यानां श्रीशिववीरमहाराणाप्रतापादिमहापुरुषाणामाचरणम् अनुकरणीयमस्ति।

सङ्घटनद्वारा किं न भवति ? किमस्ति दुष्करं कर्म यत् सङ्घटनशक्त्या सुकरं न जायते ? अस्माकं पूर्वजानां सङ्घटन-सम्बन्धिन्यो गौरवगाथाः सम्पूर्णविश्वस्य पुनरावृत्तपृष्ठेषु सुवर्णाक्षरैरंकिताः सन्ति। पुनः किमद्य कारणं, यद् वयं स्वकीयां महतीं शक्तिं विस्मृतिगर्ते निपात्य अकर्मण्या भूत्वा तिष्ठामो निजं दिष्टं च दुष्टं घोषयन्तः शपामहे ? परं पूर्णं विश्वसिमो यत्कदाचित् समयोऽपि स समेष्यति यत्रास्माकं हृदयेषु सङ्घटनसागरसुधोर्मयो महता वेगेन स्फुरिष्यन्ति याश्च न कश्चिदपि रोत्स्यति। दिनेष्वेषु सङ्घटनशक्तेः फलं प्रत्यक्षमपि विलोक्यतेऽत्र यदिदानीं लोका असम्भवमपि कार्यं सम्भवं कुर्वन्तः सङ्घटनस्य माहात्म्यं चरितार्थयिष्यन्ति। वस्तुतः सङ्घटने एव शक्तिनिवासः।

## शब्दार्थाः

| | | |
|---|---|---|
| **तनयम्** | - | पुत्रम् |
| **स्तन्यम्** | - | दुग्धम् |
| **हीनशक्तिकम्** | - | बलरहितम्, (बलहीन को) । |
| **प्रभविष्णुभिः** | - | सामर्थ्ययुक्तैः |

| | | |
|---|---|---|
| **यापयितुम्** | – | व्यतयितुं (बिताने के लिए), याप् + तुमुन् । |
| **अवधेयम्** | – | जानना चाहिए। |
| **अनुपतन्ति** | – | गिरते हैं, अनु +पत् धातु, लट् लकार, प्रथम पुरुषः, बहुवचनम्। |
| **वरीवर्ति** | – | स्वीकरोति। |
| **बिभर्ति** | – | धारणं करोति,( भरना, व्याप्त होना) भृ धातु (जुहोत्यादिगण, लट् प्र.पु.) |
| **हन्त** | – | कष्टम् |
| **भूताविष्टाः** | – | भूतेन आक्रान्ताः, भूत + आविष्टाः (दीर्घ सन्धि) |
| **कलिकाले** | – | कलियुगे, कलिकाले, सप्तमी एकवचनम्। |
| **भीता** | – | भयावृत्ता |
| **निश्चप्रचम्** | – | सुनिश्चितम् |
| **विहाय** | – | त्यक्त्वा, वि + हा + ल्यप् । |
| **दुष्करम्** | – | कठिनम् |
| **सुकरम्** | – | सरलम् |
| **पुरावृताः** | – | पूर्ववर्णितः |
| **विस्मृतिगर्ते** | – | विस्मृतिगह्वरे |
| **सुधोर्मयः** | – | अमृततरङ्गः, सुधा +उर्मयः (गुण सन्धि) |

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः–

१. 'सङ्घे शक्तिः' पाठः सङ्कलितोऽस्ति–

(क) यात्राविलासात्　　(ख) प्रबन्धमकरन्दात्

(ग) प्रबन्धामृतात्　　(घ) शास्त्रसर्वस्वात्　　(　)

२. 'सङ्घे शक्तिः कलौयुगे' इति कथितम्–

(क) वेदव्यासेन　　(ख) चाणक्येन

(ग) नवलकिशोरेण　　(घ) बाणभट्टेन　　(　)

३. 'सङ्घटनद्वारा किं न भवति'? अत्र सङ्घटनशब्दः कस्मिन् अर्थे प्रयुक्तोऽस्ति–

(क) सामूहिक–शक्तिः　　(ख) सैन्यशक्तिः

(ग) मनवचनकर्मभिः एकीभूता जनानां शक्तिः (घ) सामाजिकशक्तिः　　(　)

## ४. रिक्तस्थानपूर्तिः क्रियताम्–

(क) माताऽपि तनयं रोदनं विना न..............पाययति।

(ख) तद् बलं साम्प्रतं.............एव निवसति।

(ग) नान्यः..........विद्यतेऽयनाय।

(घ) वस्तुतः.............एव शक्तिनिवासः।

### अतिलघूत्तरात्मक-प्रश्नाः –

१. स्वभावतः एव मानवाः किं कामयन्ते ?

२. शक्तेः स्थानं कुत्र ?

३. शक्तिः कथं लक्ष्या?

४. कलौ युगे शक्तिस्वरूपं कीदृशम् ?

### लघूत्तरात्मक-प्रश्नाः–

१. पं. नवलकिशोरकाङ्करस्य परिचयं लिखत?

२. कः मानवः शत्रुं जेतुं न पारयति ?

३. अस्माकं दुर्दशानिदानं कथं भवेत् ?

### अधोलिखितवाक्येषु रेखाङ्कितान् पदान् आश्रित्य प्रश्ननिर्माणं कुरुत–

(क) <u>मानवाः</u> सर्वत्र विजयं कामयन्ते।

.................................................................................. ?

(ख) शक्तिशून्यो मानवः स्वप्नेऽपि <u>शत्रुं</u> जेतुं न पारयति।

.................................................................................. ?

(ग) <u>सङ्घटनशक्त्या</u> सुकरं जायते।

.................................................................................. ?

(घ) <u>सङ्घटने</u> एव शक्तिनिवासः।

.................................................................................. ?

### निबन्धात्मक-प्रश्नाः–

१. 'सङ्घटनस्य महत्त्वं' सविस्तरं लिखत ?

२. 'सङ्घे शक्तिः कलौयुगे' अस्य कथनस्य आशयं लिखत ?

३. अस्मात् पाठात् का शिक्षा मिलति ' इति सविस्तारं लिखत ?

## व्याकरणात्मक-प्रश्नाः-

**१. अधोलिखितपदानां सन्धिविच्छेदं कृत्वा नामापि लेख्यम्-**

| | पदम् | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|---|
| (क) | शक्तिद्वारैव | .................. | .............. |
| (ख) | स्वप्नेऽपि | .................. | ............... |
| (ग) | भूताविष्टा | .................. | .............. |
| (घ) | याश्च | .................. | ............... |

**२. अधोलिखितेषु समस्तपदेषु नामनिर्देशपूर्वकं समासविग्रहो विधेयः-**

| | समस्तपदम् | विग्रहः | समासः |
|---|---|---|---|
| (क) | भूताविष्टाः | ................ | ............. |
| (ख) | गौरवगाथाः | ................ | ............. |
| (ग) | अभावेन | ................ | ............. |
| (घ) | शक्तिशून्याः | ................ | ............. |

**३. अधोलिखितपदानां विभक्तिः वचनञ्च लिख्यताम्-**

| | पदम् | विभक्तिः | वचनम् |
|---|---|---|---|
| (क) | जगति | .............. | ............ |
| (ख) | शक्तेः | .............. | ............ |
| (ग) | अस्माकम् | .............. | ............ |
| (घ) | कारणाद् | .............. | ............ |
| (ङ) | संघटने | .............. | ............ |

**४. निम्नलिखितेषु पदेषु प्रकृतिः प्रत्ययश्च पृथक् लिख्यताम्-**

| | पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (क) | शक्तिमान् | ....................... | ......................... |
| (ख) | जेतुम् | ....................... | ......................... |
| (ग) | करणीयः | ....................... | ......................... |
| (घ) | निपात्य | ....................... | ......................... |
| (घ) | भूत्वा | ....................... | ......................... |

५. **अधोनिर्दिष्टान् पदान् आश्रित्य वाक्यानि रचयत –**

| पदम् | वाक्यम् |
|---|---|
| (क) कश्चन् | ............................................................................ |
| (ख) साम्प्रतम् | ............................................................................ |
| (ग) एव | ............................................................................ |
| (घ) अपरम् | ............................................................................ |
| (ङ) यत् | ............................................................................ |

६. **निम्नलिखितवाक्यानां वाच्यपरिवर्तनं कुरुत–**

(क) मानवाः सर्वत्र विजयं कामयन्ते।

(ख) बलं साम्प्रतं सङ्घे एव निवसति।

(ग) शक्तिद्वारैव सर्वं कर्तुं शक्यते।

(घ) जनः युद्धे विजयं लप्स्यते।

❀ ❀ ❀

# चतुर्दशः पाठः
# पितामही मिलिता

प्रस्तुता कथा आधुनिकसंस्कृतसाहित्यस्य सुप्रसिद्धेन साहित्यकारेण आचार्यनारायणशास्त्रीमहोदयेन विरचिता। अर्वाचीनसाहित्ये विभिन्नभाषाणां विविधाः विधाः अपि संस्कृते गृहीताः। लघुकथाभिः सह दीर्घकथानां प्रणयनम् अपि विशंतितमे ख्रिस्ताब्दे पर्याप्तमात्रायामभवत्। आसु कथासु सहजप्रवाहमयभाषायाः, भावानां च समावेशः तु भवत्येव, समाजस्य कृते सन्देशः अपि भवति। आचार्य नारायणशास्त्रीकांकरमहोदयस्य कथासु अपि समाजोपयोगीविषयाणां सुष्ठु लेखनं दृश्यते।

प्रस्तुता कथा आधुनिकसमाजस्य, परिवारस्य च महतीं समस्याम् प्रति सङ्केतं करोति। पुरा संयुक्ते परिवारे आबालवृद्धानां सर्वेषां सदस्यानां महत्त्वं भवति स्म, किन्तु परिवारस्य विघटित्वात् बालानां वृद्धानां च स्थितिः परिवर्तिता। विशेषतः अर्थार्जने संलग्नौ पतिः-पत्न्यौ बालान् वृद्धान् च सम्यक् रूपेण पालयितुम् न शक्नुतः, तदा वृद्धानां कृते वृद्धाश्रमाणां परम्परा प्रारब्धा। किन्तु वृद्धाश्रमेषु निवसन्तः वृद्धाः स्वोपेक्षया अपमानं अनुभवन्ति। अस्याम् कथायाम् अपि एषा एव पीडा वर्णिता। पुत्रः त्रिलोचनः पुत्रवधुः इन्दुमती च शकुन्तलां वृद्धाश्रमे नयतः, तत्र परित्यजतः। किन्तु स्वत्रिचतुर्वर्षीयस्य पुत्रस्य कृते (यः स्व पितामहीम् अतीव स्मरति) तौ स्वमातारम् वृद्धाश्रमात् आनयतः। सत्यं एव वृद्धजनाः स्नेहात्, समयात् परं अन्यं किमपि नेच्छन्ति।

## पितामही मिलिता

पितरि दिवं गते माता स्वपुत्रं त्रिलोचनं येन केन प्रकारेण आर्थिक-कष्टानि सहित्वा अपि पालितवती, पोषितवती, वर्धितवती च। तं पाठयित्वा, लेखयित्वा विद्वांसं निर्मातुं सा कामपि न्यूनतां न अरक्षत्। शिक्षकाः अपि आत्मीयं सर्वम् अपि ज्ञानं तस्मिन् सत्पात्रे निहितवन्तः। सत्यम् एव एकः विनय-सम्पन्नः सदाचारी शिष्यः गुरुं सर्वथा प्रसन्नं कृत्वा दुर्लभाम् अपि विद्यां सुलभते। विवाह-योग्याम् अवस्थां प्राप्तवता तेन सह स्वात्मजायाः विवाहं कर्तुम् इच्छुकाः अनेके सम्पन्नाः जनाः उपस्थिताः। सा प्रतिवेशिनः ग्रामस्य पटवारिणः कन्यां स्वपुत्रवधूं निर्माय गृहम् आनीतवती।

अधुना गृहे त्रयः प्राणिनः आसन्- एका सा स्वयं, द्वितीयः पुत्रः त्रिलोचनः, तृतीया इन्दुमती पुत्रवधुः च। त्रिलोचनस्य वैदुष्येण सन्तुष्टः शिक्षाविभागः तस्मै स्वकीये एव ग्रामे बालकबालिकान् शिक्षयितुं विद्यालये शिक्षकपदे नियुक्तिं दत्तवान्। पुत्रवधुः अपि स्वगृहे एव बालिकाभ्यः जीवनोपयोगि-कलानां शिक्षणं दातुं प्रारब्धवती। पुत्रवधूः शनैः शनैः बालिकानां माध्यमेन तासां सम्बन्धिनीषु प्रौढ-गृहमहिलासु शिक्षां प्रति रुचिं जागरितवती। ताः महिलाः अपि स्वबालिकाभिः सह तत्र एव उपस्थिताः भूत्वा पठन-लेखन-शिक्षां प्राप्तुं

प्रवृत्ता:। केषुचित् एव वर्षेषु सर्व: एव ग्राम: स्त्रीशिक्षाया: सम्बन्धे समृद्ध: सञ्जात:। विदुषी इन्दुमती अधुना एका आदर्श-शिक्षिका मन्यते स्म। राज्यसर्वकारेण अपि सा शिक्षक-दिवसे सम्मानिता आसीत्। एवं पुत्रस्य त्रिलोचनस्य, पुत्रवध्वा: इन्दुमत्या: च यशश्वित्तया, समृद्धिमत्तया च मातु: शकुन्तलाया: चित्तम् अति प्रसन्नम् आसीत्। इदानीं तस्या: एक एव कामना अवशिष्टा यत् सा पौत्रमुखं दृष्ट्वा एव दिवं गच्छेत्। एतदर्थं सा प्रतिदिनं प्रात: जलाभिषेकं कुर्वन्ती उमाशंकरं प्रार्थयते स्म। तस्या: प्रार्थना सफला जाता। यथासमयं इन्दुमती एकं सुन्दरं शिशुं प्रसूतवती। तदीयं मुखचन्द्रं विलोकयन्त्या: पितामह्या: शकुन्तलाया: मन: तृप्यति स्म एव न।

यथा हि सर्वेषु परिवारेषु भवति, शिशो: लालन-पालनयो: रतायै इन्दुमत्यै श्वश्रूसेवां कर्तुं पर्याप्त: समय: न मिलति स्म। जानति अपि वृद्धावस्थां प्राप्ता शकुन्तला स्वकीयान् रोषमयान् उद्गारान् प्रकटयति स्म एव। किन्तु अस्मिन् आत्मकृत्ये सा अवश्यं पश्चात्तपति स्म। श्वश्र्वा: कटु-व्यवहारं इन्दुमती भर्तु: त्रिलोचनस्य अपि सम्मुखे प्रबोधितवान्। किन्तु यदा अनेन समस्याया: समाधानं न अभवत् तदा स: अपि चिन्तित: स्थातुं प्रवृत्त:।

एकस्मिन् दिने इन्दुमती भर्तारं त्रिलोचनम् उपायं दर्शितवती, यद् अधुना वृद्धाश्रमे एव मातरं प्रापय्य निश्चिन्तताया: अनुभव: क्रियेत्। अनेन तत्र स्वसमवयस्काभि: सह माता अपि सुखिनी स्थास्यति, वयम् अपि इह दु:खोन्मुक्ता: भविष्याम:। त्रिलोचन: इन्दुमत्या: प्रस्तावेन तत्कालम् एव सहमत: अजायत। अवसरं दृष्ट्वा स: मातरं तदर्थम् अनुकूलाम् अपि कृतवान्।

त्रिलोचनं मातरं वृद्धाश्रमे प्रापय्य आगत:, किन्तु तस्य मन: नैव रमते स्म। यदि स: एकाकी अभविष्यत् तर्हि मातु: प्रत्येकम् इच्छां पूरयित्वा तां प्रसन्नाम् अरक्षिष्यत्, किन्तु पत्न्या: अपि मन: तेन रक्षणीयम् आसीत् एव।



इदानीं तयोः आत्मजः त्रिचतुर-वर्षात्मकः जातः आसीत्। पितुः मातुः उपस्थितौ अपि सः पितामहीम् एव विशेषरूपेण इच्छति स्म। अतः यदा बालकः स्वकीयां पितामहीं गृहे न दृष्टवान्, तदा सः दुःखी भूत्वा बहु-बहु रुदितवान्। सः न किंचित् अखादत्, न किंचित् अपिबत्। निरन्तरं तस्य मुखे 'पितामहि ! पितामहि ! इदम् एव रटनम् आसीत्। रुदतः रुदतः तस्य कण्ठः शुष्यति स्म।

आत्मजस्य एतां दुरवस्थां द्रष्टुम् असमर्थो दम्पती अन्ते वृद्धां वृद्धाश्रमतः आनेतुं निश्चयं कृतवन्तौ एव। तत्र ताभ्यां सह गतः बालकः पर्यपृच्छत् च- पितामहि ! त्वं मां त्यक्त्वा किमर्थम् अत्र आगतवती ? चल गृहं चल, दम्पती अपि तस्य एव कथनं समर्थितवन्तौ। अन्ये वृद्धाश्रमवासिनः चिन्तयन्ति स्म यत् अस्मान् अपि नेतुं गृहतः कश्चित् आगच्छेत् इति।

❀ ❀ ❀

## शब्दार्थाः

| | | |
|---|---|---|
| **पाठयित्वा** | – | पाठनं कृत्वा (पठ् +णिच् + क्त्वा)। |
| **स्वात्मजायाः** | – | स्वकीयां आत्मजा (पुत्री) तस्याः। |
| **प्रतिवेशिनः** | – | प्रतिवेशे वसन्ति ये (पडौसी)। |
| **जलाभिषेकम्** | – | शिवलिङ्गे जलसिंचनं इति। |
| **श्वश्रुः** | – | पत्युः माता (सास)। |
| **भर्तारम्** | – | पतिं (भर्तृ शब्द, द्वितीया एकवचन)। |
| **स्वसमवयस्काभिः** | – | समानायुः अस्ति यासां ताभिः। |
| **दुखोन्मुक्ताः** | – | दुखेभ्यः उन्मुक्ताः। |
| **पितामहीम्** | – | पितुः माता (दादी) तम्। |
| **रटनम्** | – | पुनः पुनः उच्चारणम्। |
| **सोपालम्भम्** | – | उपालम्भ सहितं (उलाहने के साथ)। |

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः –

१. त्रिलोचनस्य मातुः किं नाम आसीत् ?

(क) पार्वती (ख) सीता

(ग) शकुन्तला (घ) इन्दुमतिः ( )

२. त्रिलोचनस्य विवाहः कया सह अभवत् ?

| | | | | |
|---|---|---|---|---|
| (क) | चन्द्रमत्या | (ख) | इन्दुमत्या | |
| (ग) | बुद्धिमत्या | (घ) | सिद्धमत्या | ( ) |

३. इन्दुमतिः केन सम्मानिता ?

| | | | | |
|---|---|---|---|---|
| (क) | राज्यसर्वकारेण | (ख) | ग्रामपंचायतेन | |
| (ग) | शिक्षाविभागेन | (घ) | केन्द्रसर्वकारेण | ( ) |

४. त्रिलोचनस्य श्वसुरः कस्यां सेवायाम् आसीत् ?

| | | | | |
|---|---|---|---|---|
| (क) | पटवारः | (ख) | सरपंचः | |
| (ग) | शिक्षकः | (घ) | न कोऽपि | ( ) |

## अतिलघूत्तरात्मक-प्रश्नाः –

१. त्रिलोचनः कुत्र नियुक्तिम् अप्राप्नोत् ?

२. इन्दुमतिः बालिकानां कृते किं प्रारब्धवती ?

३. इन्दुमति ग्रामस्य प्रौढमहिलानां कृते किं कर्तुं प्रवृत्ताः ?

४. त्रिलोचनस्य पुत्रस्य आयुः कति आसीत् ?

## लघूत्तरात्मक प्रश्नाः –

१. शकुन्तलायाः परम् इच्छा का आसीत् ?

२. कामना पूर्त्यर्थं सा किं करोति स्म ?

३. इन्दुमत्या स्वश्वश्रुः वृद्धाश्रमे किमर्थं प्रेषिता ?

४. पितामहीं न दृष्ट्वा पौत्रस्य अवस्था कीदृशी आसीत् ?

५. पुत्रस्य दुरावस्थां दृष्ट्वा तौ किं कृतवन्तौ ?

## निबन्धात्मक प्रश्नाः –

१. वृद्धाश्रमवासिनः अन्ये जनाः शकुन्तलायाः परिवारं दृष्ट्वा किं अचिन्तयन् ? तेषां भावानां वर्णनं कुरुत।

२. अस्याः कथायाः सारं सन्देशं च लिखत।

३. अस्माकं व्यवहारः वृद्धजनान् प्रति कीदृशः भवितव्यः इमं विषयं अधिकृत्य एकं निबन्धं लिखत।

## व्याकरणात्मक-प्रश्नाः–

१. अधोनिर्दिष्टानां सन्धि-पदानां नामनिर्देशपूर्वकः विच्छेदः विधेयः–

| | पदम् | – | विच्छेदः | सन्धिनाम |
|---|---|---|---|---|
| (क) | जलाभिषेकम् | – | ............................... | ........................ |
| (ख) | दुःखोन्मुक्ताः | – | ............................... | ........................ |
| (ग) | सोपालम्भः | – | ............................... | ........................ |
| (घ) | स्वात्मजायाः | – | ............................... | ........................ |
| (ङ) | वृद्धावस्थाः | – | ............................... | ........................ |

२. अधोलिखितेषु पदेषु नामोल्लेखपुरस्सरसन्धिः कार्यः–

| | सन्धिपदम् | | सन्धिः | सन्धिनाम |
|---|---|---|---|---|
| (क) | स्व + आत्मीयेभ्यः | – | .......................... | .......................... |
| (ख) | दुः + चित्तया | – | .......................... | .......................... |
| (ग) | सत् + आचारी | – | .......................... | .......................... |
| (घ) | जीवन + उपयोगी | – | .......................... | .......................... |
| (ङ) | प्रति + एकम् | – | .......................... | .......................... |

३. अधोलिखितानां पदानां नामनिर्देशपूर्वक-विग्रहो विधेयः–

| | पदम् | विग्रहः | समासनाम |
|---|---|---|---|
| (क) | मनोगतं | | |
| (ख) | शिक्षकपदे | | |
| (ग) | जीवनोपयोगी | | |
| (घ) | पुत्रवधुः | | |
| (ड.) | असमर्थः | | |

४. अधोलिखितानां पदानां प्रकृति-प्रत्ययविवेचनं कुरुत।

| | पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (क) | पाठयित्वा | ............................ | ......................... |
| (ख) | शिक्षयितुम् | ............................ | ......................... |
| (ग) | दृष्ट्वा | ............................ | ......................... |

| | | | |
|---|---|---|---|
| (घ) | पालितवती | ........................... | ........................ |
| (ङ) | आरूढः | ........................... | ........................ |
| (च) | आनेतुम् | ........................... | ........................ |
| (छ) | रक्षणीय | ........................... | ........................ |
| (ज) | प्रबोधितवान् | ........................... | ........................ |

**५. अधोनिर्दिष्टेषु पदेषु विभक्ति-वचन-निर्देशं कुरुत-**

| | पदम् | विभक्तिः | वचनम् |
|---|---|---|---|
| (क) | प्रतिवेशिनः | ........................... | ........................ |
| (ख) | जलाभिषेकम् | ........................... | ........................ |
| (ग) | त्रिलोचनम् | ........................... | ........................ |
| (घ) | विदुषी | ........................... | ........................ |
| (ङ) | भर्तुः | ........................... | ........................ |
| (च) | प्रेम्णा | ........................... | ........................ |

**६. निम्नलिखितानां पदानां धातु-लकारः-पुरुषः-वचनं च निर्दिश्यत–**

| | पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| (क) | जीविष्यामि | ................ | ................. | ................ | ............ |
| (ख) | आगच्छेत् | ................ | ................. | ................ | ............ |
| (ग) | विस्मरति | ................ | ................. | ................ | ............ |
| (घ) | प्रार्थयते | ................ | ................. | ................ | ............ |
| (ङ.) | आसीत् | ................ | ................. | ................ | ............ |

## उत्तरमाला

वस्तुनिष्ठात्मक प्रश्नाः – १. ग २. ख ३. क ४. क

❀ ❀ ❀

# द्वितीयः खण्डः

## ( क ) अलङ्कारपरिचयः

काव्यशास्त्रे अलङ्काराणाम् अतिमहनीयं स्थानं वर्तते। अलङ्करोति इति अलङ्कारः, अलङ्क्रियतेऽनेनेति वा व्युत्पत्त्या अलङ्कारशब्देन शोभाधायकं वस्तुतत्त्वं वा उच्यते। लोकव्यवहारे यथा अलङ्काराः मानवाकृतिं भूषयन्ति, तस्य शोभां वर्धयन्ति, तथैव काव्यशास्त्रे शब्दार्थयोः सौन्दर्यवर्धकं तत्त्वम् 'अलङ्कार' इति उच्यते

'अलंकृतिः अलङ्कारः' इति व्युत्पत्त्या सौन्दर्यबोधः एव अलङ्कारः। अयं सौन्दर्यबोधः एव आलङ्कारिकैः काव्यस्य आत्मा इति निरूपितः।

**अलङ्कार-लक्षणम्** - भामह-आचार्येन काव्यशास्त्रे अलङ्काराणां प्राधान्यं स्वीकृतम्। प्राचीनैः आचार्यैः सौन्दर्यबोधस्य अभिधायकत्वेन काव्यशास्त्रे अलङ्काराणां प्राधान्यं स्वीकृतम्। यथा समग्रगुणसम्पन्नाऽपि नारी अलङ्कारान् विना न शोभते, तथैव काव्यमपि अलङ्काररहितं न शोभते।

अलङ्कारस्वरूपं निरूपयन् आचार्यदण्डी काव्यस्य समस्तान् शोभाधायकतत्त्वान् अलङ्कारशब्देन लक्षयति- ''**काव्यशोभाकारान् धर्मान् अलङ्कारान् प्रचक्षते**''।

अलङ्कारशब्दस्य व्यापकतां सूचयन् आचार्यो वामनः काव्यशास्त्रगतं सर्वमपि सौन्दर्यम् अलङ्कारशब्देन निरूपयति - '**सौन्दर्यम् अलङ्कारः**'।

अग्निपुराणकारेण तु अलङ्काररहितं काव्यं विधवैव निरूपितम्।

परं ध्वनिसम्प्रदायस्य प्रसिद्धिं प्राप्ते सति आचार्यैः अलङ्काराः अङ्गादिवत् शब्दार्थयोः शोभाधायकाः, रसस्य च उपकर्तारः इति निरूपिताः। यथोक्तं मम्मटेन -

**उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।**
**हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः।।**

**अलङ्काराः त्रिविधाः -**

एतेऽलङ्काराः 'यो यदाश्रितः सः तदलङ्कारः' (मम्मटः) इति नियमात् त्रिविधाः भवन्ति - १. शब्दालङ्कारः २. अर्थालङ्कारः ३. उभयालङ्कारः।

**१. शब्दालङ्कारः -**

शब्दाश्रितः योऽलङ्कारः सः शब्दालङ्कारः। यत्र काव्यसौन्दर्यं चमत्कृतिर्वा शब्दाधारिता भवति, सोऽलङ्कारः शब्दालङ्कारो वाच्यः। यथा - अनुप्रासः, यमकं, वक्रोक्तिः इत्यादयः।

एतेषु अलङ्कारेषु काव्यशोभा शब्दाश्रिता एव। उदाहरणार्थम् ' 'रसमयः समयः सः निनाय तैः' - इति यमकालङ्कारस्य उदाहरणे यदि नियतशब्दानां परिवर्तनं क्रियते- रसमयः कालः सः निनाय तैः, चेत् काव्यसौन्दर्यं नष्टं भवति, अलङ्काराभावश्च जायते। अतः यमकालङ्कारः शब्दालङ्कारः। एवमन्येऽपि ज्ञेयाः।

**२. अर्थालङ्कारः -**

योऽलङ्कारः अर्थाश्रितः भवति, सः अर्थालङ्कारः कथ्यते। अर्थालङ्कारेषु चमत्कृतिः अर्थाधारिता भवति,

अत एव शब्दानां परिवर्तनेन काव्यशोभायाः काऽपि क्षतिः न जायते। यथा – उपमा-रूपक-उत्प्रेक्षा-दीपकादयः।

एतेषु अलङ्कारेषु चमत्कारस्य आधारः अर्थो भवति। न तु शब्दः। अतः तुल्यार्थकस्य अन्यशब्दस्य प्रयोगेणापि अलङ्कारहानिर्न जायते।

३. **उभयालङ्कारः –**

योऽलङ्कारः शब्दाश्रितः अर्थाश्रितः इत्थम् उभयाश्रितः प्राप्यते, सः उभयालङ्कारः । यथा – श्लेषः।

## शब्दालङ्काराः

### १. अनुप्रासः

**लक्षणम् –**

**'अनुप्रासः शब्द-साम्यं वैषम्येऽपि स्वरस्य यत्'**

शब्दानां सादृश्यं अनुप्रासः। अत्र 'शब्द-साम्यं' इत्यस्याभिप्रायः अस्ति यत् शब्दसाम्ये स्वरव्यञ्जनयोरुभयोः अनिवार्यता नास्ति। यत्र स्वराणां असादृश्येऽपि केवलं व्यञ्जनानामेव सादृश्यं भवति तत्रापि अनुप्रासः अलङ्कारः भवति। वस्तुतः वर्णानां रसानुगतः प्रकर्षेण न्यासः अनुप्रासः भवति।

**उदाहरणम् –**

**ततो मृगेन्द्रस्य मृगेन्द्रगामी, वधाय वध्यस्य शरं शरण्यः ।**
**जाताभिषङ्गोर्नृपतिर्निषङ्गा दुद्धर्तुमैच्छत् प्रसभोधृतारि ।।**

अत्र 'मृगेन्द्र, वध, शर, षङ्ग इत्यादिषु शब्देषु क्वचित् स्वरव्यञ्जनयोः उभयोः क्वचित् व्यञ्जनमात्रस्य साम्यम्। अतः अत्र अनुप्रासः अलङ्कारः विद्यते।

**अनुप्रासोऽयम् पंचधा भवति –**

१. छेकानुप्रासः – अनेक व्यञ्जनानामेकवारं साम्यम्।
२. वृत्यनुप्रासः – एकानेकवर्णानामनेकवारं साम्यम्।
३. श्रुत्यनुप्रासः – समानस्थानीयानां वर्णानां साम्यम्।
४. अन्त्यानुप्रासः – पादान्तानां व्यञ्जनानां पूर्व स्वरेण सह आवृत्तिः।
५. लाटानुप्रासः – तात्पर्य-भेदे सति समानार्थकाणां शब्दानाम् आवृत्तिः।

### २. यमकम्

**लक्षणम् –**

**'सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।**
**क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते'।।**

यत्र सार्थकयोः परन्तु परस्परं भिन्नार्थकयोः द्वयोः वर्णसंघातयोः क्रमेण आवृत्तिर्भवति तत्र यमकालङ्कारः जायते। यमकशब्दस्य अर्थः युगलं युग्मं वा भवति। यदा पद्ये सक्रमस्य स्वरव्यञ्जन-समुदायस्य

आवृत्तिः प्राप्यते। परं तेषाम् आवृत्तानां शब्दानाम् अर्थः पृथक् पृथक् भवति, तत्र यमकालङ्कारः स्यात्।

यमकालङ्कारे आवृत्तेषु स्वरव्यञ्जन-समुदायेषु -

१. कदाचित् आवृत्तस्य पदसमुदायस्य उभे पदे सार्थके भवतः।

२. कदाचित् एकं पदं सार्थकं द्वितीयञ्च निरर्थकं भवति।

३. कदाचित् उभेपदे निरर्थके भवतः।

**उदाहरणम् -**

**नवपलाश-पलाशवनम्पुरः, स्फुटपरागपरागतपङ्कजम्।**
**मृदुलतान्तलतान्तमलोकयत्, स सुरभिं सुरभिं सुमनोभरैः।।**

**उदाहरणसङ्गतिः -**

अस्मिन् उदाहरणे यमकालङ्कारः अस्ति। यतोहि अत्र प्रथमपादे पलाशद्वयस्य अर्थद्वयमस्ति। प्रथमपलाशस्य अर्थः पत्रम्, द्वितीय 'पलाश' शब्दस्य अर्थः पलाशवृक्षः अस्ति। तथैव च चतुर्थपादे प्रथम-सुरभिपदस्य अर्थः सुगन्धः द्वितीयसुरभिपदस्य अर्थः वसन्त-ऋतुः अस्ति। अत्र प्रथमचतुर्थपादयोः आवृत्तयोः उभयोः पलाशसुरभि-पदयोः सार्थकत्वं विद्यते।

### ३. श्लेषः

**लक्षणम् -**

**'श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते।'**

यत्र श्लिष्टैः पदैः अनेकार्थानाम् अभिधानं क्रियते तत्र श्लेषालङ्कारः भवति। लक्षणे 'श्लिष्टः' इति पदस्य अभिप्रायः अनेकार्थकेन शब्देन अस्तिः। अस्मिन् अलङ्कारे एकस्मिन् पदे एव अर्थद्वयं अधिकं वा प्राप्यते।

**उदाहरणम् -** **उच्छलद् भूरि कीलालः शुशुभे वाहिनीपतिः।**

**उदाहरण सङ्गतिः -**

अत्र 'कीलालः' पदं श्लिष्टपदमस्ति। कीलालपदस्य प्रथमः अर्थः जलं द्वितीयश्च रक्तम् अस्ति। तथैव वाहिनीपतिः द्वितीयः श्लिष्टपदमस्ति वाहिनीपतिपदस्य अर्थद्वयम् विद्यते। प्रथमः अर्थः समुद्रः द्वितीयः अर्थः च सेनापतिः अस्ति। अतएव श्लिष्टपदैः अत्र अनेकार्थानां प्राप्ति भवति। अतः श्लेषालङ्कारः अस्ति।

## अर्थालङ्काराः

### ४. उपमा

**लक्षणम् -**

**'प्रस्फुटं सुन्दरं साम्यमुपमेत्यभिधीयते'।**

साम्यं = सादृश्यं उपमा इति अलङ्कारः अभिधीयते = कथ्यते। कीदृशं साम्यं-प्रस्फुटम् सुन्दरम् च। यद्यपि रूपकालङ्कारेऽपि साम्यं तु भवति किन्तु तत्र उपमानोपमेययोः मध्ये अभेदत्वात् साम्यस्य

स्फुटप्रतीतिः न भवति। अतः अत्र 'प्रस्फुटं' इति पद ग्रहणेन लक्षणस्य व्याप्ति रूपकालङ्कारे न भवति। एवमेव 'सुन्दर' पद ग्रहणस्य अभिप्रायः यत् साम्यं वैचित्र्यपूर्णं भवेत् सामान्ये साम्ये यथा- गौरिव गवयः इत्यादिषु प्रयोगे साम्येऽपि जाते वैचित्र्याभावे नास्त्युपमालङ्कारः ।

**उपमायाः अवयवानिः-** उपमायाः चत्वारि अवयवानि -

१. उपमेय - यस्य पदार्थस्य उपमा-साम्यं क्रियते।

२. उपमान - येन सह उपमा-साम्यं क्रियते।

३. साधारणधर्मः - उपमेयोपमानयो समान गुणाः क्रियादयः।

४. वाचकः शब्दः - उपमेयोपमानयोः सादृश्य-सूचकः शब्दः।

यत्र एतेषां सर्वेषां अवयवानां सति साम्यं भवति तत्र पूर्णोपमा यत्र च एकानेकानां अनुक्ते सति साम्यं भवति तत्र लुप्तोपमा भवति। अनयोः द्वयोः भेदयोः अपि श्रौती, आर्थी च इति भेदद्वयं अपि भवति उपमालङ्कारे उपमेयोपमानयोः साम्यं क्रियागतं, गुणगतं उभयगतञ्चेति त्रिविधं भवति। इत्थं एभिः भेदोपभेदैः उपमा अनेकधा भवति।

**उदाहरणम् -**

**१. हंसीव कृष्ण। ते कीर्तिः स्वर्गङ्गामवगाहते।**

अत्र उपमेयः- कीर्ति, उपमानः-हंसी, साधारण धर्मः-स्वर्गङ्गावगाहते वाचकः-इव। अत्र चतुर्णाम् उपमावयवानां विद्यमानत्वात् पूर्णोपमा विद्यते।

**२. स्नपयति हृदयेशं स्नेह-निष्यन्दिनी ते**
**धवलबहल-मुग्धादुग्ध-कुल्येव दृष्टिः।**

अत्र स्नपयति इति क्रिया साम्यं स्नेहनिष्यन्दिनी, धवलबहलमुग्धा इति गुण सादृश्यञ्च। 'ते दृष्टिः' उममेयः अस्ति, दुग्ध कुल्या उपमानः अस्ति, इव साधारण धर्मः। अतः अत्र क्रिया साम्यं गुण साम्यं च उभयसाम्यत्वात् उभयगत पूर्णोपमा अलङ्कारः अस्ति।

## ५. रूपकम्

**लक्षणम् -**

**'तद्रूपकमभेदो यः उपमानोपमेययोः'।**

'रूपयति इति रूपकम्', अस्यार्थः यत्र उपमानस्य आरोपणं उपमेये भवति तत्र रूपकं भवति। रूपकालङ्कारे उपमानोपमेययोः स्वरूपतः भेदेऽपि अति-साम्य-प्रदर्शनाय काल्पनिकोऽभेदारोपो भवति।

**उदाहरणम् -**

**संसार-विषवृक्षस्य द्वे एव रसवत्फले ।**
**काव्यामृत-रसास्वादः संगमः सज्जनैः सह।।**

**लक्षणसङ्गति** - उदाहरणेऽस्मिन् उपमेये-'संसार' उपमानस्य-'विषवृक्षस्य' आरोपः अस्ति। एवमेव काव्ये अमृतस्य आरोपः अस्ति। अस्मात् रूपकालङ्कारः अत्र।

**रूपकभेदाः –** रूपकं प्रामुख्येन त्रिविधं भवति –

(क) **साङ्गरूपकम् (ख) निरङ्गरूपकम् (ग) परम्परितरूपकम्**

## ६. उत्प्रेक्षा

**लक्षणम् –**

**'भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना'।**

यदा प्रकृतस्य (उपमेयस्य), परात्मना (उपमानेन) सह (एकात्म-भावस्य) सम्भावना प्रदर्श्यते, तदा उपमेय-उपमानयोः एकीभावस्य सम्भावनोत्थितः अलङ्कारः उत्प्रेक्षा। उत्प्रेक्षा शब्दस्य अर्थः सम्भावना एव। उत्प्रेक्षालङ्कारबोधकैः मन्ये, शङ्के, ध्रुवम् प्रायः इव नूनमित्यादिभिः शब्दैः उत्प्रेक्षा व्यज्यते। उक्तमपि –

**मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः।**
**उत्प्रेक्षा व्यच्यते शब्दैरिव शब्दोऽपि तादृशः।।**

**उदाहरणम् –**

**लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।**
**असत्पुरुषसेवेव दृष्टिर्विफलतां गता।।**

अत्र अन्धकाराधिक्यं वर्णयन् कवि सम्भावना प्रकटयति यत् तमः अङ्गानि लिम्पति इव, नभश्च मन्ये अञ्जनं वर्षति, दृष्टिश्च असत्पुरुषसेवा इव विफलतां प्राप्ता। अत्र अविद्यमानेन उपमानेन सह सम्भावना प्रदर्श्यते अतः उत्प्रेक्षा अलङ्कारः अस्ति।

**उपमा-उत्प्रेक्षयोः भेदः –**

सामान्येन उपमा उत्प्रेक्षा च उभेऽपि समानमेव प्रतीयेते। परं साम्याधारिते उपमालङ्कारे उपमेय-उपमानयोः विद्यमानता अस्तित्त्वम्-आवश्यकं भवति। उत्प्रेक्षा अलङ्कारे च उपमेय-उपमानयोः सम्भावना व्यज्यते। विषयेऽस्मिन् उपमानस्य अस्तित्वं लोकसिद्धत्वं वा आवश्यकं न भवति।

एवम् उपमालङ्कारः साम्याधारितो भवति, उत्प्रेक्षा च सम्भावनोत्थितः।

## ७. अर्थाऽन्तरन्यासः

**लक्षणम् –**

**'सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।**
**यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा'।।**

अर्थात् यत्र साधर्म्येण वैधर्म्येण वा सामान्यस्य विशेषेण-विशेषस्य सामान्येन वा समर्थ्यते तत्र अर्थान्तरन्यासोऽलङ्कारः स्यात्। अस्मिन् अलङ्कारे द्वे स्वतन्त्रवाक्ये समर्थ्यसमर्थकभावेन तिष्ठतः, प्रथमवाक्य-उक्त-कथनम् अन्येन वाक्यकथनेन समर्थ्यते, सः अर्थान्तरन्यासः अलङ्कारः।

**उदाहरणम् –**

(क) सामान्यस्य विशेषेण समर्थनम्

**बृहत्सहाय्यः कार्यान्तं क्षोदीयानपि गच्छति।**
**सम्भूयाम्भोधिमभ्येति महानद्या नगापगा ।।**

**उदाहरणसङ्गतिः –**

अत्र पूर्वार्धगतः सामान्योऽर्थः 'बृहत्सहाय्यः क्षोदीयानपि कार्यान्तं गच्छति' इति द्वितीयार्धगतेन विशेषणार्थेन। नगापगाः महानद्या सम्भूय अम्भोधिम् अभ्येति समर्थ्यते अतः अत्र अर्थान्तरन्यासोऽलङ्कारः।

(ख) विशेषस्य सामान्येन समर्थनम् –

**हनूमानब्धिमतरद् दुष्करं किं महात्मना।**

अत्र– 'हनुमानब्धिमतरद्' इति विशेष कथनं 'दुष्करं किं महात्मना' इति सामान्य कथनं विशेषस्य सामान्येन समर्थनत्वात् अत्र अर्थान्तरन्यासोऽलङ्कारो विद्यते।

## ८. विभावना

**लक्षणम् –**

**'विभावना विना हेतुर्कार्योत्पत्तिर्यदुच्यते'।**

यत्र कारणं न भवति तथापि कार्यस्य उत्पत्तिः जायते तत्र विभावना अलङ्कारः भवति।

**उदाहरणम् –**

**शशाम वृष्ट्यापि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः।**
**ऊनं न सत्त्वेष्वधिको बबाधे तस्मिन् वनंगोप्तरि गाहमाने।।**

अत्र वृष्टिकारणं विनाऽपि दवाग्निः, फलपुष्पवृद्धिः कार्यस्य उत्पत्तिः भवति अतः विभावना अलङ्कारः।

## ९. विशेषोक्तिः

**लक्षणम् –**

**'विशेषोक्तिरखण्डेषु कारणेषु फलावचः'।**

यत्र कारणं तु भवति किन्तु कार्यस्याभावः भवति तत्र विशेषोक्तिः कथ्यते। अस्मिन् अलङ्कारे कारणस्य (हेतोः) प्राप्तिः भवति तथापि कार्यस्य प्राप्तिःन स्यात्।

**उदाहरणम् –**

**धनिनोऽपि निरुन्मादा, युवानोऽपि न चंचला।**
**प्रभावोऽप्यप्रमत्तास्ते, महामहिम शालिनः।।**

**उदाहरणसङ्गतिः –**

अत्र धनरूपं, युवावस्थारूपं, प्रभुतारूपं च कारणं विद्यमानः अस्ति तथापि क्रमशः उन्माद-चंचल-प्रमादरूप -कार्यस्य अभावः अस्ति। अतएव विशेषोक्तिः अलङ्कारः।

## १०. निदर्शना

**लक्षणम् –**

**'अभवन् वस्तुसम्बन्धः उपमापरिकल्पकः।**
**निदर्शना भवेत् सेयं मम्मटेन यथोदिता' ।।**

यत्र वस्तुद्वयस्य मध्ये परस्परं सम्बन्धः स्थापितः न भवति तत्र वस्तुसम्बन्धस्य कृते उपमायाः

परिकल्पना क्रियते। सा निदर्शना उच्यते। निदर्शना पदस्य शाब्दिकार्थः उदाहरणम् अस्ति। अत्र लक्षणे आगते सति उपमा-परिकल्पकः पदम् अन्ततोगत्वा समानतायाः बोधकः अस्ति।

**उदाहरणम् -**

**क्व सूर्यप्रभवो वंशः ? क्व चाल्पविषयामतिः।**
**तितिर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ।।**

**उदाहरणसङ्गतिः -**

अल्पमत्या सूर्यवंशस्य वर्णनं तथैव भवितुम् अर्हति यथैव उडुपेन सागरतरणस्य प्रयत्नं भवति। अत्र द्वितीयवाक्यं प्रथम वाक्यस्य कृते समानतायाः बोधकः अस्ति।

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः –

(१) अलङ्कारः सौन्दर्यवर्धकं तत्त्वम् उच्यते -
(क) शब्दस्य (ख) अर्थस्य
(ग) शब्दार्थयोः (घ) काव्यशास्त्रस्य ( )

(२) 'उच्छलद् भूरि कीलालः शुशुभे वाहिनीपतिः' इत्यस्मिन् उदाहरणे अलङ्कारः अस्ति -
(क) यमकम् (ख) श्लेषः
(ग) अनुप्रासः (घ) सर्वे ( )

(३) 'उत्प्रेक्षा' शब्दस्य अर्थः अस्ति -
(क) आरोपः (ख) सम्भावना
(ग) सादृश्यम् (घ) प्रदर्शनम् ( )

(४) विभावना अलङ्कारस्य स्वरूपं भवति -
(क) कारणं विना कार्यकथनम् (ख) कार्यं विना कारण-कथनम्
(ग) भावनां विना कार्यकथनम् (घ) न कोऽपि ( )

(५) 'धनिनोऽपि निरुन्मादा' इत्यस्यां पंक्तौ अलङ्कारः अस्ति -
(क) विभावना (ख) उत्प्रेक्षा
(ग) विशेषोक्तिः (घ) रूपकम् ( )

### रिक्त स्थानानि पूरयत -

१. ..................धर्मान् अलङ्कारान् प्रचक्षते।

२. अनुप्रासः .......................................... वैषम्येऽपि स्वरस्य यत्।

३.	श्लिष्टैः पदैरनेकार्थाभिधाने ...................... इष्यते।

४.	विशेषोक्तिरखण्डेषु .................... फलावचः।

५.	अभवन् ........................ उपमा परिकल्पकः।

## लघूत्तरात्मकाः प्रश्नाः

१.	अलङ्कारः कतिविधं भवति ?

२.	प्रस्फुटं सुन्दरं साम्यं कस्मिन् अलङ्कारे भवति ?

३.	उत्प्रेक्षा अलङ्कारस्य लक्षणं लिखत।

४.	सामान्यं विशेषेण विशेषं वा सामान्येन कस्मिन् अलङ्कारे समर्थ्यते।

५.	शशामवृष्ट्यापि विना दवाग्निः– अत्र कोऽलङ्कारः कथं च ?

## दीर्घोत्तरात्मकाः प्रश्नाः

१.	उपमारूपकयोः अलङ्कारयोः भेदः सोदाहरणं लिखत।

२.	अधोलिखित उदाहरणेषु अलङ्काराणां निर्धारणं कृत्वा तेषां लक्षणं लिखत –

(क)	नवपलाशपलाशवनम्पुरः स्फुटपरागपरागतपङ्कजम्।

(ख)	लिम्पन्तीव तमोऽङ्गानि, वर्षतीवाञ्जनं नभः।
असत्पुरुष सेवेव दृष्टिर्विफलतां गता।।

(ग)	क्व सूर्य प्रभवोवंशः? क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्।।

३.	अधोलिखितानां अलङ्काराणां लक्षणपुरस्सरं परस्परं भेदनिर्धारणम् कुरुत–

(क)	श्लेषयमकयोः भेदः

(ख)	उपमारूपकयोः भेदः

(ग)	उत्प्रेक्षारूपकयोः भेदः

(घ)	विशेषोक्तिविभावनयोः भेदः

❀ ❀ ❀

## ( २ खण्डः )

### ( ख ) छन्दो-ज्ञानम्

वैदिक-लौकिक-वाङ्मये छन्दः-शास्त्रं विशिष्टस्थानं भजते। वेदार्थनिर्णये सहायकत्वेन महर्षिभिराचार्यैश्च अस्य वेदाङ्गत्वं स्वीकृतम्। पाणिनीय-शिक्षायां 'छन्दः पादौ तु वेदस्य' इत्युक्त्वा छन्दसां महत्त्वं प्रतिपादितम्। छन्दः शब्दस्य प्रवृत्तिनिमित्तत्वं निरूपतया निरुक्तकारेण यास्केन उक्तं – 'छन्दः छादनात्' (नि. ७.३.१२)। वेदाः छन्दोबद्धाः सन्ति, तेषामुच्चारणाय अर्थावबोधाय च छन्दोज्ञानमावश्यकम्, यो हि छन्दांसि अविदित्वा यज्ञादिकार्याणि साधयति, वेदान् अधीते, अध्यापयति वा सः पापीयान् भवति।

अस्य शास्त्रस्य छन्दो-विचितिः, छन्दोऽनुशासनं, छन्दो-विवृत्तिः, छन्दोनाम इत्यादि-प्राचीन-नामानि-अपि प्राप्यन्ते। अस्य छन्दो नाम्नः वेदाङ्गस्य पिङ्गलकृतं 'छन्दःशास्त्रं' वा प्रतिनिधिभूतो ग्रन्थः। अस्मिन् ग्रन्थे वैदिक-लौकिकानां छन्दसां विवेचनात्मकं विवरणं प्राप्यते। तत्र लौकिक-वाङ्मये सामान्येन नियतवर्णानां मात्राणां वा नियमबद्धं वाक्यं वाक्यसमूहो वा 'छन्दः' शब्देन अभिधीयते।

#### १. छन्दो-भेदः

पिङ्गल-छन्दःसूत्रेषु लौकिकं-छन्दसः द्विविधत्वं प्रतिपादितम् – १. वर्णच्छन्दः वृत्तं वा, २. मात्रिकच्छन्दः जातिः वा।

#### १. वर्णच्छन्दः ( वृत्तम् ) –

"वृत्तमक्षरसंख्यातम्" यच्छन्दः वर्णगणनया परिमीयते तद् वर्णच्छन्दः वृत्तं वा उच्यते। अस्य अपरनाम वर्णिकछन्दोऽपि। एषु छन्दस्सु प्रतिपादं वर्णानानामेव गणना भवति। 'वृत्तमंजरी' इति ग्रन्थे उक्तम् यद् "अक्षरैर्गणना यत्र वृत्तमिति कथ्यते'। यथा – इन्द्रवज्रा, वंशस्थ, शिखरिणी इत्यादयः।

#### २. मात्रिकच्छन्दः ( जातिः ) –

"जातिर्मात्रा कृता भवेत्" यच्छन्दः मात्रागणनया परिमीयते तत् मात्रिकच्छन्दः। अस्यापरं नाम जातिः। एषु छन्दस्सु प्रतिपादं मात्राणां गणना विधीयते, मात्रागणनया च छन्दः-स्वरूपं निश्चीयते। उक्तं हि वृत्तमंजर्याम् – "मात्राभिर्गणना यत्र सा जातिरभिधीयते"। यथा आर्या।

#### पादः –

"ज्ञेयः पादश्चतुर्थांशः" – छन्दसः चतुर्थो भागः 'पादः' इत्युच्यते। प्रत्येकं छन्दः एषु पादेषु विभक्तं भवति। पाद-पर्यायवाचित्वेन छन्दःशास्त्रे 'चरण' पदस्य प्रयोगोऽपि प्राप्यते।

#### वर्णः –

"वृणोति वाङ्मयमिति वर्णः" तदेव क्षरणरहितधर्मत्वात् अक्षरमपि कथ्यते। इह छन्दःशास्त्रे एकस्मिन् काले उच्चार्यमाणः शब्दांशः एव 'अक्षरम्' इति निगद्यते। व्याकरणदृष्ट्या स्वरवर्णः स्वरसहितव्यञ्जनं वा अक्षरपदवाक्यं भवति, न तु स्वरेण रहितम्। यथा – इन्द्रः – इत्यस्मिन् पदे 'इ' इति स्वरवर्णः 'न् द् र,' इति 'अ' स्वरेण संयुतानि त्रीणि व्यंजनानि च अक्षरपदवाक्यानि। इत्थम् अत्र 'इन्द्रः' पदे अक्षरद्वयं विद्यते 'इ –न्द्रः'।

**मात्रा –**

वर्णानामुच्चारणकालो 'मात्रा' इत्युच्यते। सा मात्रा त्रिविधा ह्रस्व-दीर्घ-प्लुतभेदात्।

**१. ह्रस्वः –**

कुक्कुटेन प्रायशः त्रिध्वनयः क्रियन्ते कु - कू - कू३ । एते ध्वनयः एव पाणिनिना उकालः, ऊकालः, ऊ३कालश्चेति त्रिधा वर्गीकृताः। 'उ' उच्चारणकालः एकमात्राकालः उच्यते, सः च कालः यस्य सः 'ह्रस्व' संज्ञो भवति।

**२. दीर्घः**

उ + उ = 'ऊ' इति उच्चारणकालः द्विमात्राकालः दीर्घवर्णः मात्राद्वयपरिमितः।

द्विमात्राकाले उच्चार्यमाणः स्वरः 'दीर्घ' संज्ञो भवति।

**३. प्लुतः -**

द्विमात्राकालात् अधिककाले उच्चारितः स्वरः 'प्लुत' संज्ञो भवति। उक्तमपि -

**एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते ।**
**त्रिमात्रिकः प्लुतो ज्ञेयो व्यंजनं चार्धमात्रिकम् ।।**

**छन्दःशास्त्रे लघु-गुरु संज्ञा –**

व्याकरणशास्त्रे स्वराणामुच्चारणकालभेदात् ह्रस्व-दीर्घ-प्लुतसंज्ञाः क्रियन्ते, परं छन्दःशास्त्रे मात्राणां गणनायै स्वराणां लघुः गुरुः वा संज्ञा विधीयते।

**१. लघुः -**

इह छन्दःशास्त्रे ह्रस्वसंज्ञो स्वरः लघुसंज्ञो भवति। अ, इ, उ, ऋ लृ - एते पंच ह्रस्वस्वराः लघु-संज्ञकाः भवन्ति। छन्दःलक्षणेषु अस्य निर्देशः ल इति पदेन क्रियते, अस्य संकेत-चिह्नं च सरलरेखासदृशं ( । ) भवति।

**२. गुरुः -**

दीर्घसंज्ञः स्वरः गुरुः कथ्यते। आ, ई, ऊ, ॠ, ए, ऐ, ओ, औ - एते समेऽपि दीर्घस्वराः इह शास्त्रे गुरुसंज्ञकाः सन्ति। श्लोकेषु प्रायः प्लुतसंज्ञकानां स्वराणाम् अभावः एव प्राप्यते। छन्दस्सु अनुस्वारेण सहितः, विसर्गेण युक्तः, संयोगपूर्वः, पदान्तगो ह्रस्ववर्णश्च गुरुसंज्ञो भवति। पदान्ते विद्यमानः गुरुवर्णोऽपि क्वचित् विकल्पेन लघुः मन्यते। छन्दोमंजर्याम् उक्तं यत् -

**सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत् ।**
**वर्णः संयोगपूर्वश्च तथा पदान्तगोऽपि वा ।।**

छन्दःलक्षणेषु गुरुवर्णस्य निर्देशः 'गु' इति संक्षिप्ताक्षरेण क्रियते। अस्य संकेतचिह्नं च अवग्रहवत् (ऽ) अस्ति।

**गणः -**

छन्दस्सु वर्णानां मात्राणां च गणनसौकर्य्यार्थं गण-व्यवस्था विधीयते। तत्र वर्णिकछन्दस्सु वर्णानां गणनायै वर्णात्मकगणाः प्रयुज्यन्ते। एतैः गणैः छन्दःसु लघुगुरुवर्णानां क्रमः निश्चीयते।

**वर्णात्मको गणः –**

वर्णात्मको गणः वर्णत्रयसमूहात्मको भवति। अनेन वर्णत्रयसमूहेन गणे लघुगुरुवर्णानां स्थितिः स्पष्टीक्रियते। यदि लघु–गुरुवर्णत्रिकं विविध–क्रमेण लिख्यते, चेत् तस्य गणपरिचायकत्रिकस्य अष्टौ भेदाः भवन्ति। ते च सन्ति – यगण–मगण–तगण–रगण–जगण–भगण–नगण–सगणाः। एषां स्वरूपमस्ति–

**मस्त्रिगुरुस्त्रिलघुश्च नकारो भादिगुरुः पुनरादिलघुर्यः ।**
**जो गुरुमध्यगतो रलमध्यः सोऽन्तगुरुः कथितोऽन्तलघुस्तः ।।**

| गणः | | लक्षणम् | | चिह्नम् | |
|---|---|---|---|---|---|
| मगणः | = | मस्त्रिगुरुः | = | मगणे त्रिगुरुवर्णाः भवन्ति। | ऽऽऽ |
| नगणः | = | त्रिलघुश्च नकारो | = | नगणे त्रिलघुवर्णाः भवन्ति। | ।।। |
| भगणः | = | भादिगुरुः | = | भगणे आदिवर्ण गुरुः, अन्यौ द्वौ वर्णौ लघू भवतः। | ऽ।। |
| यगणः | = | आदिर्लघुः | = | यगणे आदिवर्णः लघुः, अन्यौ द्वौ वर्णौ गुरू भवतः। | ।ऽऽ |
| जगणः | = | जो गुरुमध्यगतो | = | जगणे मध्यमो वर्णः गुरुः, आदि–अन्तिमौ लघू भवतः। | ।ऽ। |
| रगणः | = | रलमध्यः | = | रगणे मध्यमो वर्णः लघुः, आदि–अन्तिमौ वर्णौ गुरू भवतः। | ऽ।ऽ |
| सगणः | = | सोऽन्तगुरुः | = | सगणे अग्रिमौ वर्णौ लघू, अन्तिमो वर्णः गुरुः भवति। | ।।ऽ |
| तगणः | = | अन्तलघुस्तः | = | तगणे अग्रिमौ वर्णौ गुरू, अन्तिमो वर्णः लघुः भवति। | ऽऽ। |

गणस्वरूपं लघुनोपायेन ज्ञातुमेकं लघुसूत्रमपि विद्यते – **'यमाताराजभानसलगाः'।**

अस्य सूत्रस्य प्रयोगः छात्रैः एकादशकक्षायामपि विहितः। अस्य साहाय्येन गणस्वरूपमतिसरलया अवगन्तुं शक्यते। अस्मिन् सूत्रे प्रारम्भिकाः अष्टौ वर्णाः गणपरिचायकाः सन्ति, अन्तिमौ द्वौ लगौ वर्णौ च लघुगुर्वोः संक्षिप्ताक्षरे स्तः। अस्य सूत्रस्य अष्टौ वर्णाः गणनामपरिचायकाः, ते च स्वाग्रिमवर्णाभ्यां स्वस्वरूपं स्पष्टीकुर्वन्ति। यथा – 'य' वर्णः गणनामपरिचायकः स च मा–ताभ्यां वर्णाभ्यां सम्मिल्य यगणस्वरूपं प्रदर्शयति 'यमाता' इति। एतेन वर्णसमूहेन 'लघु–गुरु' वर्णानां संकेतो गृह्यते, तस्य चिह्नानि च ' ।ऽऽ ' इति। एवमन्येऽपि गणाः श्रेयाः। तेषां गणानां स्वरूपं निम्नचक्रेणापि बोद्धुं शक्यते –

**गणचक्रम्**

| | गणः | सूत्रांशः | स्वरूपम् | गणचिह्नानि |
|---|---|---|---|---|
| १. | यगणः | य | यमाता | ।ऽऽ |
| २. | मगणः | मा | मातारा | ऽऽऽ |
| ३. | तगणः | ता | ताराज | ऽऽ। |
| ४. | रगणः | रा | राजभा | ऽ।ऽ |
| ५. | जगणः | ज | जभान | ।ऽ। |
| ६. | भगणः | भा | भानस | ऽ।। |
| ७. | नगणः | न | नसल | ।।। |
| ८. | सगणः | स | सलगा | ।।ऽ |

उक्तमपि –

**आदिमध्यावसानेषु भजसा यान्ति गौरवम् ।**
**यरता लाघवं यान्ति मनौ तु गुरुलाघवम् ।। इति ।।**

यतिः –

पद्यपाठे जिह्वायाः इष्टविश्रामस्थानं कविभिः यतिः उच्यते। विच्छेदः, विरामः, विरतिः इत्यादयः यतिपर्यायाः।

अत्रास्मिन् प्रकरणे इन्द्रवज्रा, शालिनी, भुजङ्गप्रयातम्, द्रुतविलम्बितम् , वसन्ततिलका, हरिणी, शिखरिणी, मन्दाक्रान्ता, शार्दूलविक्रीडितम्, स्रग्धरा इति प्रमुख दश छन्दानां लक्षणोदाहराणि प्रदत्तानि –

## छन्दः

## १. इन्द्रवज्रा

लक्षणम् –

**'स्यादिन्द्रवज्रा यदि तौ जगौ गः'**

अस्य छन्दसः प्रत्येकस्मिन् चरणे ११ वर्णाः भवन्ति। सर्वेषु पादेषु क्रमशः तगणः, तगणः जगणः द्वौ च गुरुवर्णौ भवतः। यद्यपि अत्र यतिनिर्देशो नास्ति तथापि पञ्चमे, षष्ठे च अक्षरे यतिः भवति।

उदाहरणम् –

**तगण तगण जगण, गु.गु.**
**ऽ ऽ ।, ऽ ऽ ।, । ऽ ।, ऽ ऽ**
**भानुः सकृद्युक्त तुरङ्ग एव = ११ वर्णाः**
**रात्रिन्दिवं गन्धवहः प्रयाति ।**
**शेषः सदैवाहितभूमिभारः**
**षष्ठांशवृत्तेरपि धर्म एषः ।।**

## २. शालिनी

लक्षणम् –

**'मात्तौ गौ चेच्छालिनी वेदलोकैः'**

यस्य प्रत्येकस्मिन् पादे क्रमशः एको मगणः, द्वौ तगणौ, द्वौ च गुरुवर्णौ भवतः तच्छन्दः 'शालिनी' इति ज्ञेयः। अस्य छन्दसः प्रत्येक चरणे एकादश वर्णाः भवन्ति। चत्वार (वेदाः), सप्त (लोकाः) वर्णे च यति कार्याः।

उदाहरणम् –

**मगण तगण तगण, गु.गु.**
**ऽ ऽ ऽ, ऽ ऽ ।, ऽ ऽ ।, ऽ ऽ**
**सा निन्दन्ति स्वानि भाग्यानि बाला = ११ वर्णाः**

बाहूत्क्षेपं क्रन्दितुं च प्रवृत्ता।
स्त्रीसंस्थानं चाप्सरस्तीर्थमारा
दुत्क्षिप्यैनां ज्योतिरेकं जगाम ।।

## ३. भुजङ्गप्रयातम्

**लक्षणम् –**

**'भुजङ्गप्रयातं चतुर्भिर्यकारैः'**

चतुर्भिः यकारैः यगणैः भुजङ्गप्रयातं स्यात्।

यस्मिन् छन्दसि प्रतिचरणं चत्वारो यगणाः वर्तन्ते तच्छन्दो भुजङ्गप्रयातम् इति नाम्ना प्रसिद्धम्। अत्रापि द्वादशसंख्याकाः वर्णाः प्रतिचरणम् भवन्ति।

**उदाहरणम् –**

यगण यगण यगण यगण
। ऽ ऽ । ऽ ऽ । ऽ ऽ । ऽ ऽ
त्वमेकं शरण्यं त्वमेकं वरेण्यं = १२ वर्णाः
त्वमेकं जगत्पालकं स्वप्रकाशम्।
त्वमेकं जगत्कर्तृ पातृ प्रहन्तृ
त्वमेकं परनिश्चलं निर्विकारम् ।।

## ४. द्रुतविलम्बितम्

**लक्षणम् –**

**'द्रुतविलम्बितमाह नभौ भरौ'**

यस्य छन्दसः प्रतिचरणं क्रमशः नगण-भगण-भगण-रगणाः च भवन्ति। तत् द्रुतविलम्बितनामकं छन्दो भवति। अस्य प्रत्येकस्मिन् चरणे द्वादशवर्णाः भवन्ति।

**उदाहरणम् –**

नगण भगण भगण रगण
।।। ऽ।। ऽ।। ऽ।ऽ
इतर-पाप-फलानि य- दृच्छया = १२ वर्णाः
वितर तानि स हे चतुरानन ।
अरसिकेषु कवित्वनिवेदनम्
शिरसि मा लिख मा लिख मा लिख ।।

## ५. वसन्ततिलका

**लक्षणम् -**

**'उक्ता वसन्ततिलका तभजाजगौ गः'**

यस्य प्रत्येकस्मिन् चरणे तगणः, भगणः, जगणः, पुनः जगणः गुरुः गुरुश्च यथाक्रमं भवन्ति, चतुर्दश-वर्णात्मकं तद्वृत्तं वसन्ततिलकेति प्रसिद्धम्।

**उदाहरणम् -**

**तगण भगण जगण जगण, गु.गु.**

ऽ ऽ ।,ऽ । ।, । ऽ ।,। ऽ ।, ऽ ऽ

**पद्माकरं दिनकरो विकची करोति = १४ वर्णाः**

**चन्द्रो विकासयति कैरवचक्रवालम् ।**

**नाभ्यर्थितो जलधरोऽपि जलं ददाति**

**सन्तः स्वयं परहिते विहिताभियोगाः ।।**

## ६. हरिणी

**लक्षणम् -**

**'नसमरसलागः षड्वेदैर्हयैर्हरिणी मता'**

यस्य छन्दसः प्रतिचरणे नगणः सगणः मगणः रगणः सगणः लघुगुरुश्च वर्णाः भवन्ति, तच्छन्दः हरिणीर्नाम मता। सप्तदशवर्णात्मकेऽस्मिन् छन्दसि षष्ठे (रसाः), चतुर्थे (वेदाः), सप्तमे (हयैः) वर्णे च यतिः कार्या।

**उदाहरणम् -**

**नगण सगण मगण रगण सगण ल.गु.**

। । ।,।।ऽ, ऽ ऽ ऽ, ऽ । ऽ, ।। ऽ,। ऽ

**अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे = १७ वर्णाः**

**विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुलाः ।**

**तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं**

**मम विरहजां न त्वं वत्से शुचं गणयिष्यसि ।।**

## ७. शिखरिणी

लक्षणम् –

**'रसैः रुद्रैश्छिन्ना यमनसभला गः शिखरिणी'**

यत्र प्रत्येकस्मिन् चरणं क्रमशः यगणः, मगणः, नगणः, सगणः, भगणः पूर्वकमन्ते च एको लघुवर्णः तदन्ते चैको गुरुवर्णः स्यात्। सप्तदशवर्णात्मकमिदं छन्दः इति शिखरिणी। अस्मिन् छन्दसि रसैः = षड्वर्णान्ते, रुद्रैः = एकादशवर्णान्ते च यतिः अर्थात् विरामो भवति।

उदाहरणम् –

**यगण मगण नगण सगण भगण, ल.गु.**

**। ऽ ऽ, ऽ ऽ ।, । । ।, । । ऽ, ऽ । ।, । ऽ**

**पृथिव्यां पुत्रास्ते, जननि बहवः सन्ति सरलाः, = १७ वर्णाः**

**परं तेषां मध्ये विरल तरलोऽहं तव सुतः ।**

**मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे,**

**कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ।।**

## ८. मन्दाक्रान्ता

लक्षणम् –

**'मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम्'**

अस्मिन् छन्दसि प्रत्येकस्मिन् पादे यथाक्रमं मगणः, भगणः, नगणः, द्वौ तगणौ अन्ते च गुरुद्वयं आयातः। अपि च (अम्बुधिः) चतुर्थे, (रसाः) षष्ठ, (नगाः) सप्तमे वर्णे यतिः भवति, इति सप्तदशवर्णात्मकं छन्दः भवति।

उदाहरणम् –

**मगण भगण नगण तगण तगण, गु.गु.**

**ऽ ऽ ऽ, ऽ ।।, । ।।, ऽ ऽ ।, ऽ ऽ ।, ऽ ऽ**

**अध्याक्रान्ता वसतिरमुनाऽप्याश्रमे सर्वभोग्ये = १७ वर्णाः**

**रक्षायोगादयमपि तपः प्रत्यहं संचिनोति ।**

**अस्यापि द्यां स्पृशति वशिश्चारणद्वन्द्वगीतः**

**पुण्यः शब्दो मुनिरिति मुहुः केवलं राजपूर्वः ।।**

## ९. शार्दूलविक्रीडितम्

**लक्षणम् –**

**'सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम्'**

यस्मिन् छन्दसि सर्वेषु पादेषु क्रमशः मगणः, सगणः, जगणः, सगणः, द्वौ तगणौ, अन्ते च गुरुवर्णः स्यात्, तत् 'शार्दूलविक्रीडितम्' नाम छन्दः। एकोनविंशतिवर्णात्मकं अस्मिन् छन्दसि द्वादशवर्णे (सूर्यैः), सप्तवर्णे (अश्वैः), च विरामो (यति) भवति।

**उदाहरणम् –**

**मगण सगण जगण  सगण  तगण तगण,  गु.**
**ऽ ऽ ऽ,। । ऽ,। ऽ। ,  । ।ऽ,ऽ ऽ ।,  ऽ ऽ ।, ऽ**
**केयूराणि न भूषयन्ति पुरुषं हारा  न चन्द्रोज्ज्वलाः =  १९ वर्णाः**
**न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्धजाः ।**
**वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते**
**क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ।।**

## १०. स्रग्धरा

**लक्षणम् –**

**'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्'**

यस्य छन्दसः प्रतिचरणं क्रमशः मगण–रगण–भगण–नगणः – त्रयः यगणाश्च युक्तः भवति, तच्छन्दः 'स्रग्धरा' कथितः। एकविंशतिवर्णात्मके अस्मिन् छन्दसि प्रति सप्तमे वर्णे (त्रिमुनिः) यतिः भवति।

**उदाहरणम् –**

**मगण  रगण  भगण  नगण यगण  यगण  यगण**
**ऽ ऽ ऽ ,  ऽ । ऽ,ऽ   ।।,। । ।,। ऽ ऽ, । ऽ ऽ, । ऽ ऽ,**
**या सृष्टिः स्रष्टुराद्या,   वहति विधिहुतं या हविर्या च होत्री,**
**ये द्वे कालं विधत्तः, श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।**
**यामाहुः  सर्वबीज  प्रकृतिरिति यया प्राणिनः प्राणवन्तः,**
**प्रत्यक्षाभिः   प्रपन्नस्तनुभिरवतु   वस्ताभिरष्टाभिरीशः ।।**

# अभ्यासः

## वस्तुनिष्ठप्रश्नाः –

१. छन्द शास्त्रस्य प्रणेता अस्ति–

(क) लगधमुनिः (ख) पिङ्गलमुनिः

(ग) सायणाचार्यः (घ) पाणिनिः ( )

(२.) छन्दः शास्त्रस्य नाम न वर्तते–

(क) छन्दोविचितिः (ख) छन्दोविवृत्तिः

(ग) छन्दोनुशासनम् (घ) छन्दाचरणम् ( )

(३.) संयुक्तवर्णस्य पूर्ववर्ती वर्णः भवति–

(क) लघुः (ख) गुरुः

(ग) यादृच्छिकः (घ) नियमः नास्ति ( )

(४.) तगणस्य स्वरूपमस्ति –

(क) आदिलघुः (ख) मध्यगुरुः

(ग) अन्तगुरुः (घ) अन्तलघुः ( )

## अतिलघूत्तरात्मकाः-प्रश्नाः –

१. गणः कः कथ्यते ?

२. गणाः कति भवन्ति ?

३. मगणस्य स्वरूपं लिख्यताम् ।

४. छन्दः शास्त्रे 'यति' शब्दस्य अर्थः कः अस्ति ?

५. कः गणः त्रिगुरुः भवति ?

६. प्रतिचरणं चत्वारः यगणाः कस्मिन् छन्दसि भवन्ति ?

७. नगणस्य स्वरूपं लिख्यताम् ।

## लघूत्तरात्मकाः-प्रश्नाः –

१. भुजङ्गप्रयातछन्दसः लक्षणं लिख्यताम्।

२. अधोलिखितोदाहरणेषु निर्धारणं कृत्वा तेषां लक्षणं लिखत –

(क) 'वसन्ततिलका तभजा जगौ गः' इत्यस्यार्थः स्पष्टीक्रियताम्।

(ख) गणसूचक-चक्रं स्पष्टीकरणीयम् ।

(ग) शिखरिणी छन्दसः उदाहरणं लिख्यताम्।

## निबन्धात्मक-प्रश्नाः –

१. छन्दोभेदाः निरूप्यताम् ?

२ . शार्दूलविक्रीडितं छन्दसः लक्षणं सोदाहरणं निरूपयत ?

❀ ❀ ❀

## ( तृतीयः खण्डः )

# संस्कृतसाहित्येतिहासः

मुख्यतः द्विधा विभक्तमस्ति–वैदिकसाहित्यं लौकिकसाहित्यञ्च। वैदिकसाहित्यस्य अन्तर्गते संहिता–ब्राह्मण–आरण्यक–उपनिषद् इत्यादीनि साहित्यानि सन्ति। वेदाङ्गानि अपि वैदिकसाहित्ये एव परिगणितानि। लौकिकसाहित्यस्य अपि द्विधा विभाजनं प्राप्यते–दृश्यं श्रव्यं च। दृश्यं नाट्यसाहित्यम्। श्रव्यम् अपि त्रिधा विभक्तमस्ति – पद्यमयं, गद्यमयं, चम्पूरूपम् च। छन्दोबद्धरचना पद्यं भवति। यस्मिन् काव्ये छन्दांसि न भवन्ति तत्काव्यं गद्यकाव्यम् भवति। यत्र गद्यं पद्यं च मिश्रितं भवति तत्काव्यं चम्पूः भवति।

साहित्यदर्पणे अपि उक्तम् अस्मिन् विषये–'गद्यपद्यमयं काव्य चम्पूरित्यभिधीयते' इति। पद्यकाव्यस्य पुनः त्रिधा विभाजनं प्राप्यते – महाकाव्यं खण्डकाव्यं मुक्तकं च। गद्यकाव्यस्य द्वौ भेदौ स्तः – कथा आख्यायिका च। आधुनिकयुगे सामान्यतः हिन्दीसाहित्यप्रभावेण कथा अपि द्विधा विभज्यते उपन्यासरूपेण कहानीरूपेण च। परं तु एताः सर्वाः कथाः एव सन्ति।

## ( अ ) वैदिकसाहित्यम्–

### वेदपरिचयः

सम्पूर्णसंस्कृसाहित्ये वेदानां स्थानं सर्वोपरि वर्तते। अस्माकं देशे भारतवर्षे धर्मव्यवस्था वेदाधारिता एव अस्ति। वेदाः धर्मनिरूपणे स्वतन्त्रभावेन प्रमाणम्, समृत्यादयस्तु तन्मूलकतया प्रमाणम्। वेदस्य प्रसिद्धिः श्रुतिरूपेण अस्ति, यतः वेदाः श्रुतिपरम्परया एव प्राचीनकालात् इदानीं पर्यन्त सुरक्षिताः सन्ति। श्रुतिस्मृत्योः विरोधे श्रुतिः एव गरीयसी, इदं सर्वमान्यमतम्। न केवलं धर्ममूलकतया एव वेदाः समादृताः अपितु विश्वस्मिन् सर्वप्राचीनग्रन्थतया अपि वेदाः एव सर्वेषाम् भारतीयविद्यानाम् आधाराः सन्ति। वेदेषु–दर्शनशास्त्रस्य, राजनीति–शास्त्रस्य, अध्यात्मज्ञानस्य, समाजशास्त्रस्य, मनोविज्ञानस्य, आयुर्वेदस्य, गणितशास्त्रस्य, अर्थशास्त्रस्य, काव्यशास्त्रस्य, कामशास्त्रस्य एवञ्च बहुविधकलानां वर्णनम् प्राप्यते। प्राचीनकाले समस्तधार्मिककार्याणि, सामाजिककार्याणि, व्यावहारिककार्याणि च वेदसमर्थितानि एव आसन्।

वेदाः भारतीयसंस्कृतेः मूलस्रोतांसि सन्ति। भारतीयसंस्कृतेः यथार्थज्ञानम् वैदिकसाहित्येन एव उपलभ्यते। भारतीयसंस्कृतेः स्वरूपस्य, यथा– यज्ञेषु अखण्डविश्वास्य, एकात्मस्वीकृत्या बहुदेववादे विश्वासस्य, निष्कामकर्मणा कर्त्तव्यतायाः, परमात्मतत्त्वस्य सर्वव्यापकतायाः, ज्ञानकर्मणोः समन्वयस्य, भौतिकवादं प्रति अनास्थायाः, पुनर्जन्मनि विश्वासस्य, पुरुषार्थचतुष्टयस्य सम्प्राप्तेः च, सम्यक् बोधः प्राप्यते। मानवकर्त्तव्यस्य बोधनार्थं वेदाः सर्वाधिकाः प्रामाणिकग्रन्थाः सन्ति। अत्र मानवमात्रस्य कर्तव्याकर्तव्ययोः यथास्थानं प्रतिपादनम् अस्ति। वेदेषु पितृपुत्रयोः, गुरुशिष्ययोः, स्त्रीपुरुषयोः, मातापित्रोः, व्यक्ति-समाजयोः च सर्वसम्बन्धानाम् आदर्शस्य च विशदं विवेचनं प्राप्यते। वेदेषु चतुर्ण्णां वर्णानामपि कर्तव्यनिर्देशः प्राप्यते।

वेदः प्रमुखतया द्विविधः अस्ति – मन्त्ररूपः ब्राह्मणरूपश्च। मन्त्रसमुदायः एव संहिताशब्देन व्यवह्रियते। ब्राह्मणरूपः वेदभागः संहिताभागस्य व्याख्यारूपः विद्यते। अयम् ब्राह्मणभागः यागस्वरूपबोधकः अस्ति। ब्राह्मणग्रन्थः अपि त्रिधा विभक्तः भवति – ब्राह्मणम्, आरण्यकम्, उपनिषद् च। यज्ञस्वरूपप्रतिपादकः ब्राह्मणभागः। अरण्ये पठिताः यज्ञस्य आध्यात्मिकरूपं विवेचयन्तः वेदभागाः आरण्यकानि। उपनिषदः ब्रह्मात्मबोधिकाः मोक्षसाधिकाः सन्ति। वेदस्य अन्तिमरूपतया उपनिषद् 'वेदान्तः' इत्युच्यते। ब्राह्मणभागः गृहस्थानां कृते उपयोगी, आरण्यकभागः वानप्रस्थानां कृते, उपनिषद्भागश्च संन्यस्तानां हेतोः बहूपयोगी भवति।

**वेदशब्दार्थः –**

ज्ञानार्थक–'विद्' धातोः 'घञ्' प्रत्यययोगात् 'वेद' शब्दः निष्पद्यते। वेदशब्दस्य अर्थः ज्ञानम् अस्ति। 'विदन्ति ये धर्मब्रह्मणी क्रियामयं ब्रह्म वा अनेन इति वेदः।' इत्थं येन धर्मस्य ब्रह्मणः क्रियामयस्य ब्रह्मणः वा ज्ञानं भवति, सः वेदः कथ्यते।

यथाहि – बह्वृचप्रातिशाख्ये – **'विद्यन्ते धर्मादयः पुरुषार्थाः यैः, ते वेदाः'। सायणेन अपि उक्तम्– अपौरुषेयं वाक्यं वेदः इति।** एवमेव ऋग्वेदभाष्यभूमिकायामपि उक्तम्– **इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो वेदयति स वेदः।** वेद एव अन्तिमं प्रमाणम् इति स्वीकुर्वन्ति मनीषिणः।

यथाहि–

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।**
**एतं विदन्ति वेदेन तस्मात् वेदस्य वेदता।।**

आम्नायः, आगमः, श्रुतिः, वेदः, इति सर्वे शब्दाः पर्यायाः सन्ति।

सोऽयं वेदः 'त्रयी' इति पदेनापि व्यवह्रियते। वेदरचनायाः त्रिप्रकारकत्वेन त्रयीति कथ्यते। या रचना पद्यमयी सा 'ऋक्' या गद्यमयी सा 'यजुः', या पुनः समग्रा गानमयी रचना सा 'साम' इति कथ्यते। अतएव जैमिनिना उक्तम्– **'तेषामृग् यत्रार्थवशेन पादव्यवस्था। गीतिषु सामाख्या। शेषे यजुः शब्दः'** इति।

अतः यत्र कुत्रापि प्राचीनग्रन्थे वेदार्थे 'त्रयी' इति पदं प्रयुक्तं तत्र सर्वत्र रचनात्रैविध्यं मनसि कृतमिति बोध्यम्। यत्तु केचन ''ऋग्यजुः सामाख्यास्त्रय एव वेदाः पूर्वमासन्'', तद्यथा –

**'अग्नेर्ऋचो वायोर्यजूंषि सामादित्यात्'।** – छान्दोग्य ब्राह्मण, ६/१७
**'अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्'।**
**दुदोह यज्ञसिद्ध्यर्थमृग्यजुः सामलक्षणम्।।** मनुस्मृति, १/१३

अतः वेदानां त्रित्वात् एव तत्र त्रयीति व्यवहारः वास्तवः न प्रकारभेदकृतः इति तद् अयुक्तम्, ऋग्वेदे अपि अथर्ववेदनामोल्लेखदर्शनात्। महर्षिणा पतञ्जलिना अपि 'चत्वारो वेदाः साङ्गाः सरहस्याः' इति पस्पशाह्निके स्पष्टतया उक्तम्। महर्षिः जैमिनिः अपि मन्त्राणां त्रिप्रकारकतामेव लक्षितवान्, न वेदसंख्यां व्यवस्थापितवान्। अतः वेदाः चत्वारः एव, त्रयीति व्यवहारस्तु प्रकारकृतः।

## ऋग्वेदः –

वैदिकसाहित्यस्य समग्रासु रचनासु ऋग्वेदः प्राचीनतमः महत्त्वपूर्णश्च अस्ति। अस्मिन् वेदे प्राचीनस्य भारतीयादर्शस्य, मर्यादायाः, ज्ञानस्य, मानवतायाः च समग्ररूपेण जीवन्तचित्रणं कृतमस्ति। छन्दोबद्धकारणात् इयं संहिता 'ऋग्वेदसंहिता' इति नाम्ना अभिहिता। छन्दोबद्धानां पद्यात्मकानां मन्त्राणां ऋक् ऋचा वा नाम अस्ति। संहिताशब्दस्य अर्थः, 'संग्रहः' विद्यते। एवम् ऋचां विशदसंग्रहः एव ऋग्वेदः अस्ति।

अयम् ऋग्वेदः सूक्तमण्डलभेदेन द्विधा विभक्तः अस्ति। तत्र सूक्तं चतुर्विधं विभक्तम् अस्ति– ऋषिः देवताच्छन्दोऽर्थसूक्तभेदात्। ऋषिदृष्टमन्त्रसमूहः ऋषिसूक्तम्। एकदेवताकमन्त्राणां समूहः देवतासूक्तम्। समानमन्त्राणां समूहः अर्थसूक्तम्। सु=सुष्ठु उक्तत्वात् 'सूक्तम्' इत्याख्यायते।

ऋग्वेदस्य मण्डलानुवाकवर्गभेदेन अष्टकाध्यायसूक्तभेदेन द्विप्रकारकः विभागः प्राप्यते। प्रथमविभागान्तर्गते ऋग्वेदे दशमण्डलानि, पञ्चाशीतयश्चानुवाकाः, अष्टोत्तरशतद्वयमिताश्च वर्गाः सन्ति। द्वितीये विभागान्तर्गते अष्टौ अष्टकानि, चतुष्षष्टिरध्यायाःसप्तदशोत्तरसहस्राणि च सूक्तानि प्राप्यन्ते।

सर्वे मन्त्राः दशसहस्रचतुःशतसप्तषष्टिपरिमिताः सन्ति, इति शाकलः। शौनकानुक्रमणी दशसहस्रपञ्चाशताशीतिपरिमितान् मन्त्रान् (१०५८०) उल्लिखति। अत्र कालभेदेन मन्त्रवृद्धिलोपः एव भेदस्य कारणम्। सर्वेऽपि मन्त्राः चतुर्दशसु छन्दस्सु विभक्ताः सन्ति।

ऋग्वेदान्तर्गते मन्त्रद्रष्टारः ऋषयः गृत्समदविश्वामित्र-वामदेव-अत्रि-भरद्वाज-वसिष्ठादयः सन्ति। ऋग्वेदस्य दशसु मण्डलेषु नवमं मण्डलं पवमानमण्डलम् अस्ति। अस्मिन् मण्डले सोमविषयकमन्त्राणां सङ्कलनमस्ति। पवमानः सोमः। उपर्युक्ताः मन्त्रद्रष्टारः ऋषयः द्वितीयमण्डलतः सप्तमण्डलपर्यन्तगताभिः ऋग्भिः सम्बद्धाः, दशममण्डले मन्त्राः नानाऋषिसम्बद्धाः। दशमे मण्डले न केवलं देवतास्तुतयः, अपि तु अन्यविषयकाः मन्त्राः अपि दृश्यन्ते। द्वितीयमण्डलात् आरभ्य सप्तममण्डलपर्यन्तस्य ऋग्वेदभागस्य रचना सर्वतः प्राचीना, दशमं मण्डलं सर्वतः अर्वाचीनम्, शेषाणि मध्यकालिकानि इति साम्प्रतिका आलोचकाः कथयन्ति।

ऋग्वेदस्य प्रमुखतया पञ्चशाखाः प्राप्यन्ते-शाकलः वाष्कलः, आश्वलायनः, सांख्यायनः, माण्डूकायनश्च। ऋग्वेदस्य मन्त्राः एतदतिरिक्तेषु त्रिषु अपि वेदेषु प्राप्यन्ते। सामवेदस्तु प्रायेण ऋग्वेदस्य मन्त्रैः एव उच्चारणभेदेन कल्पितः अस्ति। एवम् अस्य ऋग्वेदस्य महत्ता प्रमुखतया स्पष्टा। भाषासाहित्यदृष्ट्ययोः अपि ऋग्वेदः अनुपमग्रन्थः अस्ति। धार्मिकदृष्ट्या अपि अयम् अद्वितीयः यत्र आर्याणां प्राचीनविचारव्यवहारयोः समग्ररूपेण सङ्कलनमस्ति।

## यजुर्वेदः –

यजुर्वेदशब्दः यजुः वेदशब्दयोः योगात् निष्पन्नः भवति। यजुः शब्दस्य विद्वद्भिः अनेके व्युत्पत्तिजन्याः अर्थाः प्रकटिताः। यथा – 'यजुर्यजतेः', इज्यतेऽनेनेति यजुः, अनियताक्षरावसानो यजुः इति। तात्पर्यमिदमस्ति यत् यज्ञसम्बन्धिमन्त्राः यजुः, येन यज्ञयागादिकः सम्पन्नः भवति सः यजुः येषु मन्त्रेषु पद्यानामिव अक्षरसंख्याः निर्धारिताः न सन्ति तानि यजूंषि इति। यजूंषि गद्यानि।

यज्ञे अध्वर्युभिः उपयुज्यमानाः मन्त्राः एव यजुर्वेदे सङ्कलिताः सन्ति। यज्ञस्य वास्तविकं विधानं अध्वर्युः एव करोति। अतः अयं यजुर्वेदः यज्ञविधेः अतिसन्निकृष्टं सम्बन्धं रक्षति।

यजुर्वेदः मुख्यतः द्विधा विभक्तः अस्ति- कृष्णयजुर्वेदः, शुक्लयजुर्वेदश्च। पौराणिकमतानुसारम्- ''व्यासः वैशम्पायनाय वेदं प्रोवाच, सः स्वशिष्याय याज्ञवल्क्याय प्रोक्तवान्। कस्माच्चिदपि कारणात् रुष्टो वैशम्पायनो याज्ञवल्क्यम् उवाच- देहि मदधीतं वेदमिति। याज्ञवल्क्यः गुरुवचनस्य अनुपालनाय ततः अधीतं वेदस्य सद्यः वमनं कृतवान्। वैशम्पायनस्य अन्ये शिष्याः तित्तिरिरूपं धृत्वा याज्ञवल्क्येन वान्तं वेदं गृहीतवन्तः। स एवार्थ वान्तगृहितः वेदः कृष्णयजुर्वेदः अस्ति।''

वैशम्पायने कुपिते सति तस्मात् अधीतं वेदं विसृज्य याज्ञवल्क्यः पुनर्वेदसम्प्राप्तये सूर्यदेवम् आराधितवान्, सूर्यदेवात् सम्प्राप्तः वेदः शुक्लयजुर्वेदनाम्ना प्रसिद्धः। अनयोः द्वयोः वेदयोः मध्ये महदन्तरं दृश्यते।

शुक्लयजुर्वेदे विनियोगवाक्यरहिताः मन्त्राः सन्ति। कृष्णयजुर्वेदे विनियोग-वाक्यात्मकाः मन्त्राः सन्ति। शुक्लयजुर्वेदः अमिश्रितरूपः कृष्णयजुर्वेदस्तु मिश्रितरूपः अस्ति।

सोऽयं यजुर्वेदः ४० अध्यायान्, ३०३ अनुवाकान्, १९७५ कण्डिका (मन्त्रान्), २९६२५ शब्दान्, ८८८७५ अक्षराणि च धारयति (युनक्ति)। अस्य वेदस्य प्रथमेऽध्याये दर्शपौर्णमासौ, द्वितीये पिण्डपितृयज्ञः, तृतीये अग्निहोत्रं चातुर्मासस्येष्टिः, चतुर्थाध्यायात् अष्टमाध्यायपर्यन्तम् अग्निष्टोमविधानं सोमयाः, नवमे वाजपेयः राजसूयश्च, दशमे सौत्रामणिः, एकादशाध्यायात् अष्टादशाध्यायपर्यन्तम् अग्निचयनम्, उखाभरणम्, चितयः, रुद्रहः, शतरुद्रियम्, वसोर्धारा, राष्ट्रभृत् च। अस्मात् परं चत्वारिंशदध्यायपर्यन्तम् अश्वमेधपुरुषमेधपितृमेधसर्वमेधः सदृशाः विविधाः यागाः वर्णिताः सन्ति। अस्यान्तिमः अध्यायः ईशावास्योपनिषद्रूपः अस्ति।

शुक्लयजुर्वेदस्य संहिता वाजसनेयिसंहिता अपि कथ्यते। अस्याः नामकरणप्रसङ्गे इदं प्रसिद्धं यत् याज्ञवल्क्येन आराधितः सूर्यः वाजी भूत्वा तस्मै वेदस्य उपदेशं कृतवान्, तत्कालादेव इयं संहिता वाजसनेयिसंहिता नाम्ना प्रसिद्धा जाता।

शुक्लयजुर्वेदस्य द्वे शाखे स्तः - माध्यन्दिनशाखा कण्वशाखा च। माध्यन्दिन-शाखा उत्तरभारते प्राप्यते तथा च कण्वशाखा दक्षिणभारते महाराष्ट्रे लभ्यते। अनयोः शाखयोः संहिते भिन्नेऽपि स्वल्पमेव भेदं धारयतः, बहुष्वंशेषु समानता विद्यते।

कृष्णयजुर्वेदस्य चतस्रः शाखाः प्राप्यन्ते-

**१. तैत्तिरीयशाखा-** इयं प्रधाना शाखा, अस्यां शाखायां सप्तखण्डाः सन्ति, ते च खण्डाः अष्टकशब्देन काण्डशब्देन च ज्ञायन्ते। इमे प्रपाठकाः बहुषु अनुवाकेषु विभक्ताः सन्ति।

**२. मैत्रायणी संहिता-** इमे द्वे अपि संहिते तैत्तिरीयसंहितामनुकुरुतः।

**३. काठकसंहिता-** केवलं क्रमे यत्र तत्र पार्थक्यं दृश्यते।

## सामवेदः -

वैदिके वाङ्मये सामवेदस्य अपि स्थानम् अतिमहत्त्वपूर्णमस्ति। भगवता श्रीकृष्णेन, 'वेदानां सामवेदोऽस्मि' इति ब्रुवन् अस्य महिमानम् उद्घोषितः। महर्षिणा शौनकेन अपि उक्तम्- 'सामानि यो वेत्ति स वेदतत्त्वम्।' तात्पर्यमिदम् अस्ति यत् यः साम जानाति स एव वेदरहस्यं जानाति। ऋग्वेदे अथर्ववेदे चापि अस्य महत्त्वं प्रतिपादितम् वर्तते। ऋग्वेदः कथयति- 'यो जागार तमु सामानि यन्ति', अर्थात् यः जागरणशीलः तस्मै सामस्य प्राप्तिः भवति। अथर्ववेदेऽपि उक्तम्- 'सामानि यस्य लोमानि' इति। अस्य तात्पर्यमस्ति यत् सामानि परब्रह्मणः लोमानि सन्ति। एवम् सामगानस्य परम्परा अतिप्राचीना अस्ति। ऋग्वेदकालेऽपि यज्ञानुष्ठाने ऋत्विजः उच्चस्वैरः सामगानं कुर्वन्ति स्म। इदमेव सामगानं सङ्गीतशास्त्रस्य मूलम् अस्ति।

यज्ञे चत्वारः ऋत्विजः भवन्ति- १. होता, २. अध्वर्युः, ३. उद्गाता, ४. ब्रह्मा। होता-आह्वानकर्त्ता, स हि यज्ञावसरे प्रक्रान्तदेवतानां प्रशंसायां रचितान् मन्त्रान् उच्चारयन् देवताः आह्वयति, तत्कार्याय सङ्कलिताः मन्त्राः स्तुतिरूपतया ऋचः समाख्याताः, तेषां संग्रहः एव ऋग्वेदः। अध्वर्युः विधिवत् यज्ञं सम्पादयति, तत्रावश्यकमन्त्राः यजूंषि, तत्संग्रहो यजुर्वेदः। उद्गाता- उच्चस्वरेण गानकर्ता, स हि स्वरबद्धान् मन्त्रान् उच्चैः गायति, तदपेक्षितमन्त्रसंग्रहः सामवेदः। ब्रह्मा यज्ञनिरीक्षकः कृताकृतान्वेक्षणकर्ता स हि सर्वविधमन्त्रज्ञः भवति। तदपेक्षितो मन्त्रराशिरथर्ववेद इति कथ्यते।

सामवेदस्य गानप्रचुरता प्रसिद्धा। ऋचः एव गीयन्ते। सामवेदे १५४८ मन्त्राः सन्ति, तेषु ७५ मन्त्राः एवंविधाः ये 'ऋग्वेदे' न प्राप्यन्ते, शेषाः ऋग्वेदे अपि सन्ति। सामवेदगतमन्त्राणां सप्त स्वराः, यतस्ते गीयन्ते। ऋग्वेदे पुनस्तेषामेव मन्त्राणां त्रयः एव स्वराः। एतावनेव उभयवेदसाधारणानां साममन्त्राणाम् ऋग्वेदमन्त्रेभ्यः भेदः।

सामवेदस्य विभागद्वयमस्ति-आर्चिकम् ज्ञानश्च। आर्चिकस्यापि विभागद्वयम्-पूर्वार्चिकम् उत्तरार्चिकञ्च। पूर्वार्चिकमेव छन्दः छन्दसी, छन्दसिका चेति त्रिभिः नामभिः कथ्यते। विषयानुसारं पूर्वार्चिकं चतुर्षु भागेषु विभज्यते आग्नेयपर्व (अग्निसम्बन्धि-मन्त्रयुतम्), ऐन्द्रपर्व (इन्द्रसम्बन्धिनीभिर्ऋग्भिर्युतम्) पवमानपर्व (सोमविषयकम्), आरण्यकपर्व (अरण्यज्ञानसम्बन्धितम्) च।

उत्तरार्चिकम् तु अनुष्ठाननिर्देशकम् (यज्ञानुष्ठाननिर्देशकम्) तस्य बहवो विभागाः। तत्र दशरात्रम्, संवत्सरम्, ऐकाहम्, अहीनम्, सत्रम्, प्रायश्चित्तम्, क्षुद्रश्चेति प्रमुखाः भेदाः सन्ति।

सामगानम् चतुर्विधम् अस्ति- ग्रामगानम्, आरण्यज्ञानम्, ऊहगानम्, ऊह्यगानञ्च। ग्रामगानं प्रकृतिगानं कथ्यते, आरण्यगानं रहस्यज्ञानरूपेण प्रसिद्धम्। ऊहगानम् ऊह्यगानयोः आधारः ग्रामगानम् आरण्यगानञ्च।

सामगानस्य विधिः अतिकठिना वर्तते। अस्य ज्ञानार्थं सूक्ष्मज्ञानस्य कठिनपरिश्रमस्य च आवश्यकता भवति। 'पञ्चविधसूत्रानुसारम्' सामगानस्य पञ्च भेदाः सन्ति- प्रस्ताव-उद्गीथ-प्रतिहार-उपद्रव-निधनानि। छान्दोग्योपनिषदः अनुसारम् सामगानस्य सप्त भेदाःसन्ति। उपर्युक्ते भेदे 'विकारस्य' 'आदेः' द्वयोः योगः भवति।

सामगाने सङ्गीतानुरूपं यत् शाब्दिकं परिवर्तनं क्रियते तत् 'सामविकार:' कथ्यते। सामविकारा: षड्विधा: भवन्ति- विकार-विश्लेषण-विकर्षण-अभ्यास-विराम-स्तोमरूपादय: इति।

निष्कर्ष: कथयितुं शक्नुम: यत् सामगानस्य प्राणा: स्वरा: सन्ति:। 'साम' इत्यस्य आरम्भ: 'ओम्' इति शब्देन भवति- 'ओमिति सामानि गायन्ति।' अस्य अवसान अपि 'ओम्' इति स्वरेण भवति। एतेषां गीतात्मकानां मन्त्राणां सङ्कलनमेव अत्र कृतम् अस्ति।

## अथर्ववेद: -

महर्षिणा अथर्वणा दृष्टत्वात् अयं वेद: अथर्ववेद: इति कथ्यते। अस्मिन् वेदे धातुविधाया:, अभिचारक्रियाया: च प्रधानता अस्ति। अत्र २० काण्डानि, ७३० सूक्तानि, २९८७ मन्त्रा: सन्ति। एषु मन्त्रेषु द्वादशशतमन्त्रा: ऋग्वेदेऽपि प्राप्यन्ते। विंशकाण्डे १५३ सूक्तानि सन्ति, तेषु द्वादशसूक्तानि अतिरिच्य शेषाणि सर्वाण्यपि ऋग्वेदस्य दशममण्डले समुपलभ्यन्ते।

अथर्ववेदस्य नव शाखा: आसन्, परं सम्प्रति द्वे एव शाखे उपलभ्येते शौनकपिप्पलादसमाख्ये। प्रचलिता अथर्वसंहिता शौनकशाखान्तर्गता अस्ति, पैप्पलादिशाखान्तर्गतसंहिताऽपि अचिरेणैव मुद्रिता।

अथर्ववेदस्य वर्ण्यविषय: त्रिषु भागेषु विभक्त: अस्ति- अध्यात्मम्, अधिभूतम् अधिदैवतञ्च। अध्यात्मविभागान्तर्गते ब्रह्मण:, परमात्मन: चतुर्णाम् आश्रमाणाम् च निर्देश: प्राप्यते। अधिभूतान्तर्गते राजा-राज्य-संग्रामादीनां विषयाणां वर्णनम् अस्ति। अधिदैवतविभागे देवता-यज्ञ-काल-सम्बन्धिविषयाणां विवेचनं प्राप्यते।

अथर्ववेदे रोगानिवारका: अनेके मन्त्रा: सङ्कलिता: ये 'भैषज्यानि' कथ्यन्ते। अत्र रुज: (रोगा:) दानवरूपेण कल्पिता: यै: रोगोत्पत्ति: भवति। अत्रैव रुजठ: (रोगान्) दूरीकर्तुम्, तेषां प्रवर्तकानां असुराणां विनाशं कर्तुम् च विविधोपाय: वर्णित: अस्ति। कासं दूरीकर्तुम् एकस्मिन् स्थले एवम् प्रार्थना कृतास्ति -

**यथा सूर्यस्य रश्मय: परापतन्त्याशुभत्।**
**एवा त्वां कासे प्रपत समुद्रस्यानु विक्षरम्।।**

अत्र 'आयुष्यसूक्ते' स्वास्थ्य-दीर्घायुष्ययो: प्राप्तये अनेके प्रार्थना-मन्त्रा: सङ्कलिता: सन्ति। अत्रैव दीर्घायुष्याय 'जीवेम शरद: शतम्' इति प्रार्थना अस्ति। अथर्ववेद कतिपयेषु सूक्तेषु अनिष्टनिवारणाय, पशुरक्षणाय, हल-प्रवहणाय, बीजवपनाय, अन्नवृद्ध्यै व्यवसायवृद्ध्यै विविधविषयसम्बन्धिता: प्रार्थना-मन्त्रा: सन्ति ये 'पौष्टिकानि' कथ्यन्ते।

'प्रायश्चित्तम् इत्यस्य अन्तर्गते विभिन्नेषु यज्ञयागादिषु अनुष्ठानेषु विहितानाम् दोषाणां परिमार्जनाय पापमोचनार्थम् प्रायश्चित्तविधानं कृतमस्ति। अपराध-मोचनस्य एक: मन्त्र: एवम् अस्ति-

**यदि जाग्रत यदि स्वप्नेन एनस्योऽकरम्।**
**भूतं मा तस्माद् भव्यं च द्रपदादिव मुञ्चताम्।।**

अत्र कतिपयेषु मन्त्रेषु तत्कालीन-राजनैतिकदशाया: चित्रणम् अपि प्राप्यते। मन्त्रा: 'राजकर्माणि' रूपेण प्रसिद्धा: सन्ति।

अथर्ववेदे विज्ञानस्य विविधानाम् अङ्गानां विकास: अपि दृश्यते। अस्य विशदपर्यालोचनेन इदं ज्ञायते यत् तत्समये 'विज्ञानम्' विकसितावस्थायाम् आसीत्। रोगोत्पादकृमीणां विस्तरेण वर्णनं तान् विनाशयितुम् उपाया: अपि वर्णिता:। अत्र शल्यचिकित्साया: अपि चर्चा प्राप्यते। एवमेव अभिचार-क्रियाया: प्रधानतयाऽपि आध्यात्मिक उच्चताया:, राजनैतिकनिपुणताया:, कृषि-कर्मण:, नीतिशास्त्रस्य स्वास्थ्यविज्ञानस्य च उच्चतमावस्थाया: दर्शनं भवति।

## ब्राह्मणग्रन्था: -

वेदो द्विविध: मन्त्रभाग: ब्राह्मणभागश्च। मन्त्रभागेन सदृश: ब्राह्मणभाग: अपि वेद: एव अस्ति। संहितानन्तरम् अस्य द्वितीयं स्थानम् अस्ति। ब्राह्मणग्रन्था: वेदव्याख्यारूपा: सन्ति। वेदशेषभूता इमे ब्राह्मणग्रन्था:। यज्ञानुष्ठानस्य विस्तृतं वर्णनं कुर्वन्ति। कतिचन कथा अपि ब्राह्मणेषु प्राप्यन्ते।

अत्र यज्ञक्रियाया: रहस्यमयस्य अर्थस्य प्रतिपादनमस्ति, अनेकेषु स्थलेषु वैदिकमन्त्राणां दार्शनिक: विचार: दृश्यते। यज्ञक्रियारीते: व्यवधानवर्णनम्, यजमानस्य यज्ञफलप्राप्ते: सम्यक् निरूपणम् च अत्र कृतमस्ति।

प्रत्येकवेदशाखानुसारेण ब्राह्मणानि आरण्यकग्रन्थाश्च भिन्ना: सन्ति, तत्र ब्राह्मणानि यथा-

ऋग्वेदस्य ऐतरेयब्राह्मणम्, कौषीतकि-ब्राह्मणञ्चेति ब्राह्मणद्वयमस्ति। अनयो: ऐतरेयब्राह्मणे अष्टौ पञ्चिका:, प्रतिपञ्चके पञ्चाध्याया:, एवम् समग्ररूपेण मिलित्वा ४० अध्याया: सन्ति। कौषीतकिब्राह्मणे केवलं त्रिंशत् ३० अध्याया: सन्ति।

अथर्ववेदस्य ब्राह्मणम् गोपथब्राह्मणमस्ति। अत्र खण्डद्वयमेव अस्ति। प्रथमे खण्डे पञ्चाध्याया: द्वितीये च षट् अध्याया: सन्ति। ब्राह्मणग्रन्थेषु सर्वत: अभिनवोऽयं ग्रन्थ: कथ्यते।

## आरण्यकग्रन्था: -

ब्राह्मणम्, आरण्यकम्, उपनिषदश्च वैदिकसाहित्यस्य पूरकसंहिता: सन्ति। ब्राह्मणग्रन्थानां पश्चात् आरण्यकानां महत्त्वपूर्णं स्थानमस्ति। वैदिक-संहिताया: अन्तिम: भाग: ब्राह्मणम्, ब्राह्मणस्य अन्तिम: भाग: आरण्यकम्, आरण्यकस्य अन्तिम: भाग: उपनिषद: च सन्ति। आरण्यकग्रन्था: उपनिषद्ब्राह्मणग्रन्थयो: मध्यवर्तिन: सन्ति।

यस्य साहित्यस्य अध्ययनं अध्यापनं च नगरग्रामाभ्यां दूरात् अरण्ये भवति स्म तत् साहित्यम् 'आरण्यकम्' कथ्यते। अरण्येषु निवासिनां वानप्रस्थानाम् यज्ञादे: कर्मविवेचनात्मका: ग्रन्था: 'आरण्यकम्' कथ्यन्ते। आचार्यसायणमते अरण्येषु अध्यापनकारणादेव एतत् साहित्यम् 'आरण्यकम्' इति नाम्ना प्रसिद्धम्।

एतेषु आरण्यकेषु यज्ञानां आध्यात्मिकानां विषयाणां विवेचनं कृतमस्ति। एतेषु विशेषरूपेण प्राणविद्याया: महिमा प्राप्यते। ऐतरेये आरण्यके प्राणस्य विभिन्नगुणानां उल्लेख: प्राप्यते- "**प्राणेन एव अन्तरिक्षस्य वायो: च स्रष्टा अस्ति। प्राण एव पिता अस्ति।**" आरण्यकेषु प्राण: ऋषिरूपेण कल्पित: अस्ति। एवम् आरण्यकसाहित्यस्य विवेच्य: विषय: 'प्राणविद्या' अस्ति यस्या: साधना शान्ते एकान्ते च वातावरणे भवति।

ऋग्वेदस्य आरण्यकद्वयमस्ति- ऐतरेयमारण्यकम् शाङ्खायनारण्यकञ्च। कृष्णयजुर्वेदस्य तैत्तिरीयमारण्यकम्। सामवेदस्य जैमिनीयोपनिषद्ब्राह्मणमेव तवलकारारण्यकमिति नाम्ना प्रसिद्धम्। अस्मिन् साममन्त्राणां प्रभावोत्पादिनी व्याख्या कृता अस्ति।

### उपनिषद्ग्रन्था: -

वेदानाम् अन्तिमो भाग: वेदान्त:। वेदान्त एव उपनिषद् कथ्यते। उपनिषच्छब्द: उप-नि-उपसर्गद्वयपूर्वस्य क्विप्प्रत्ययान्तस्य 'षद्लृ' धातो: योगात् निष्पन्न: भवति। 'षद्लृ' धातो: अर्थत्रयम् अस्ति- विशरणं=नाशम्, गति:=प्राप्ति:, अवसादनं=शिथिलनम् च। अस्य अर्थ: भवति यत् 'या विद्या परम्परया गुरो: समीपे उपविश्य प्राप्यते, तथा च यया समस्तानर्थोत्पादिकानां सांसारिकक्रियाणां नाश: भवति, संसारस्य कारणभूताया अविद्याया: बन्धनं शिथिलं भवति, ब्रह्मसाक्षात्कार: च भवति, सा विद्या उपनिषद् कथ्यते'। अत्र ब्रह्म-जीव-जगत्सम्बन्धिविषयाणां विशदं विवेचनं प्राप्यते। उपनिषत्सु ब्रह्म-जीव-संसार-सम्बन्धिरहस्यमपि प्रतिपादितमस्ति।

मुक्तोपनिषदि उपनिषदां संख्या १०८ उल्लिखिता। तत्र १० उपनिषद: ऋग्वेदसम्बद्धा:, १९ उपनिषद: शुक्लयजुर्वेदसम्बद्धा:, ३२ कृष्णयजुर्वेदसम्बद्धा:, १६ सामवेदसम्बद्धा:, ३१ अथर्ववेदसम्बद्धा:। वेदान्ताचार्या: एतासु उपनिषत्सु कतिचनोपनिषद: स्वमतानुसारिव्याख्यया भूषितवन्त:। तासु दश उपनिषद: प्रसिद्धा:- ईश-केन-कठ-प्रश्न-मुण्डक-माण्डूक्य-तैत्तिरीय-ऐतरेय-छान्दोग्य-बृहदारण्यकोपनिषद:। श्वेताश्वतरोपनिषदेकादश्यपि प्रसिद्धा अस्ति।

कतिचनोपनिषद: गद्यात्मिका:, कतिचन पद्यात्मिका: कतिचन गद्यपद्योभयात्मिकाश्च। आसामुपनिषदां रचनाकाल: भिन्न:, परं प्रसिद्धा: कतिचन उपनिषद: बुद्धकालात्प्राचीन एवेति सर्वसम्मतम्।

उपनिषद: अतिसरलसरसशैल्यां तत्त्वं प्रकाशयन्ति। ऐतेन तासां महत्त्वं लोकप्रियत्वं चानुदिनम् अवर्धत्। आसां तत्त्वप्रकाशनशैल्या: निदर्शनं यथा -

**आत्मानं रथिनं विद्धि शरीरं रथमेव तु।**
**बुद्धिं तु सारथिं विद्धि मन: प्रग्रहमेव च।।**
**इन्द्रियाणि हयानाहु: विषयांस्तेषु गोचरान्।**
**आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण:।।**

भारतीयदर्शनस्य प्राणस्वरूपा गीताऽपि उपनिषद्रूपेण एव प्रसिद्धा।

### वेदाङ्गानि

संहिता-ब्राह्मण-आरण्यक-उपनिषद्-एभ्य: अतिरिक्तं वेदस्य षड् अङ्गानि सन्ति-शिक्षा, कल्प:, निरुक्तम्, व्याकरणम् छन्द: ज्योतिषञ्च। महर्षिणा पाणिनिना स्वशिक्षायाम् एवम् उल्लिखितम्-

**छन्द: पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।।**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ।।** (पा.शि. ४१-४२)

पतञ्जलिनाऽप्युक्तम् पस्पशाह्निके- 'ब्राह्मणेन निष्कारणो धर्म: षडङ्गो वेदोऽध्येयो ज्ञेयश्च।'

## १. शिक्षा –

शिक्षा नाम तत् शास्त्रम् येन वेदमन्त्राणामुच्चारणं शुद्धं सम्पाद्यते। वेदे स्वराणां प्राधान्यं सर्वविदितम् स्वरज्ञानं च शिक्षाया अधीनम्, अत एव इदं शिक्षाशास्त्रं वेदाङ्गम्। सम्प्रति त्रिंशत्संख्याकाः शिक्षाग्रन्थाः उपलभ्यन्ते। तेषु याज्ञवल्क्यशिक्षा, वाशिष्ठीशिक्षा, कात्यायनीशिक्षा, पाराशरीशिक्षा, अमोघानन्दिशिक्षा, नारदीशिक्षा, शौनकीयशिक्षा, गौतमीशिक्षा, माण्डूकी शिक्षा, पाणिनीया शिक्षा च मुख्याः। पाणिनीया शिक्षा तु सर्वतोऽधिकं प्रसिद्धा अस्ति।

## २. कल्पः

ब्राह्मणकाले यागस्य तावान् प्रचारः जातः यत् तेषां यथावत् ज्ञानाय पूर्णपरिचयप्रदायकग्रन्थानां आवश्यकता अनुभूयते स्म। तामेव आवश्यकतां स्वल्पैः शब्दैः पूरयितुं कल्पसूत्राणां रचना जाता।

कल्पसूत्राणि द्विविधाणि सन्ति– श्रौतसूत्राणि स्मार्तसूत्राणि च। श्रुत्युक्त–योगविधिप्रकाशकानि श्रौतसूत्राणि। स्मार्तसूत्राणि अपि द्विविधानि–गृह्यसूत्राणि धर्मसूत्राणि च।

श्रौतसूत्रेषु अग्नित्रयाधानम्, अग्निहोत्रम्, दर्शपूर्णमासौ, पशुयागः नानाविधाः सोमयागाः चेति विषयाः सम्यक् विवेचिताः सन्ति।

गृह्यसूत्रेषु तेषामनुष्ठान–आचारयागानां वर्णनं विद्यते येषां सम्पादनं द्विजैः अवश्यं करणीयम्। षोडशसंस्काराणां विशिष्टं वर्णनमपि तत्र प्राप्यते।

धर्मसूत्रेषु धार्मिकनियमाः, प्रजानां राज्ञां च कर्तव्यानि, चत्वारो वर्णाः, चत्वारः आश्रमाः, तेषां धर्माः पूर्णरूपेण विवेचिताः सन्ति। एतानि धर्मसूत्राण्येव स्मृतीनां उत्पत्तिकारणानि विवेचितानि सन्ति।

शुल्वसूत्रमपि कल्पसूत्रमेव, तत् श्रौतसूत्रान्तर्गतम्। शुल्वं मापनक्रिया। इदं सूत्रमेव भारतीयज्यामितिशास्त्रस्य प्रवर्तकम्।

प्रत्येकस्य वेदस्य पृथक् पृथक् कल्पसूत्रम् अस्ति। ऋग्वेदस्य कल्पसूत्रम्– आश्वलायनं शाङ्खायनञ्च। शुक्लयजुर्वेदस्य कल्पसूत्रम्– कात्यायनश्रौतसूत्रञ्च। अनयोः कल्पसूत्रयोः श्रौतगृह्यधर्मशुल्वसूत्राणि सर्वाण्यपि सन्ति।

सामवेदस्य कल्पसूत्रम्– लाटायनश्रौतसूत्रम् द्राह्यायणञ्च। जैमिनीयशाखायाः श्रौतसूत्रम्– जैमिनिगृह्यसूत्रम्, गोभिलगृह्यसूत्रम्, खादिरगृह्यसूत्रञ्च। अथर्ववेदस्य कल्पसूत्रम्– वैतानश्रौतसूत्रम्, कौशिकसूत्रञ्च।

## ३. निरुक्तम्

निरुच्यते निःशेषेण उपदिश्यते निर्वचनविधया तत्तत् अर्थबोधनाय पदजातं यत्र तत् निरुक्तम्।

यद्यपि व्याकरणेनापि निर्वचनमुखेन पदानाम् अर्थावबोधः सिद्ध्यति तथापि निरुक्तानुसारेणैव अर्थाः निर्वक्तव्याः इति मुन्यनुशासनाद् व्याकरणसाध्यकतिपयकार्यविधायित्वाच्च शास्त्रमिदं पृथक् प्रणीतम्।

उपलभ्यमानो निरुक्तग्रन्थो यास्कस्य कृतिः। पाणिनेः प्राचीनोऽयं यास्कः ९०० ई. पूर्वकालिकः स्यादिति विदुषामभिप्रायः।

अत्र यास्कनिरुक्ते चतुर्दशाध्यायाः। बहवस्तु द्वादशाध्यायात्मकमेवेदं शास्त्रं मन्यन्ते अन्तिमौ द्वौ अध्यायौ पश्चात् योजितौ स्तः इति केचन मन्यन्ते।

## ४. व्याकरणम्

भाषा लोकव्यवहारसाधिका भवति। यदि भाषा न स्यात् तर्हि इदं जगत् अन्धे तमसि निमज्जेत्। यथा हि दण्डिना उक्तम् –

**इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।**

भाषायाः व्युत्पादनाय शुद्धये वा व्याकरणस्य अपेक्षा भवति। व्याकरणज्ञानविरहितः मनुष्यः साधून् शब्दान् प्रयोक्तुं समर्थः न भवति। वेदस्य रक्षार्थमपि व्याकरणाध्ययनम् आवश्यकम्। वेदरक्षाक्षमतयैव व्याकरणस्य वेदाङ्गत्वमपि समर्थ्यति। महर्षिणा पतञ्जलिना व्याकरणस्य अध्ययनस्य सर्वाणि प्रयोजनानि महाभाष्ये उक्तानि, यथा– 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्।'

पाणिनेः अष्टाध्यायी कात्यायनस्य वार्तिकं पतञ्जलिकृतमहाभाष्यम् चैतत् मुनित्रयस्य व्याकरणं प्रसिद्धम्। परं तु भविष्यपुराणे ब्राह्मपर्वणि अष्टप्रकारकं व्याकरणं स्मृतम्–

**प्रथमं प्रोच्यते ब्राह्मं द्वितीयमैन्द्रमुच्यते।**
**याम्यं प्रोक्तं ततो रौद्रं वायव्यं वारुणं तथा।।**
**सावित्रं च तथा प्रोक्तमष्टमं वैष्णवं तथा।**

लघुत्रिमुनिकल्पतरुकृतस्तु नव–व्याकरणानि स्मरन्ति–

**ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।**
**सारस्वतं चापिशलं शाकलं पाणिनीयकम्।।**

एषु सर्वेष्वपि व्याकरणेषु लौकिकवैदिकोभयविधसाधकतया पाणिनीय–व्याकरणस्यैव प्राधान्यम् अस्ति। अतएव पाणिन्युपज्ञं व्याकरणं प्रसिद्धम्।

## ५. छन्दः

मन्त्राणां छन्दोबद्धतया छन्दसां ज्ञानं विना वेदमन्त्राः साधु उच्चारयितुं न शक्याः। शौनकविरचिते ऋक्प्रातिशाख्यस्य चरमे भागे छन्दसां पर्याप्तं विवेचनं प्राप्यते। अस्य छन्दश्शास्त्रस्य पिङ्गलच्छन्दः सूत्रनाम्ना ग्रन्थः सर्वाधिकः प्रसिद्धः। अयं केनचित् पिङ्गल–नामकेन आचार्येण विरचितः। अत्र वैदिकानि लौकिकानि च छन्दांसि विवेचितानि सन्ति।

## ६. ज्योतिषम्

इदं कालविज्ञापकं शास्त्रम्। मुहुर्तं शोधयित्वैव क्रियमाणाः यज्ञादिक्रिया–विशेषाः फलाय कल्पन्ते, नान्यथा, तन्मुहूर्त्तज्ञानञ्च ज्योतिषशास्त्राधीनम् आर्चज्योतिषेऽपि एवमेव उक्तम् –

**वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः।**
**तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञम्।।** (आर्चज्योतिषम् ३६)

चतुर्णामपि वेदानां पृथक् पृथक् ज्योतिषशास्त्रमासीत्। तेषु सामवेदस्य ज्योतिषशास्त्रं नोपलभ्यते। अन्येषां त्रयाणां वेदानां ज्योतिषग्रन्थाः प्राप्यन्ते, यथा –

१. ऋग्वेदस्य ज्योतिषम्–आर्चज्योतिषम्

२. यजुर्वेदस्य ज्योतिषम्–याजुषज्योतिषम्

३. अथर्ववेदस्य ज्योतिषम्–आथर्वणज्योतिषम्, इति।

एतेषां त्रयाणामपि ज्योतिषां प्रणेता लगधो मुनिः अस्ति। अत्र याजुषज्योतिषस्य प्रामाणिकं भाष्यद्वयमपि प्राप्यते, एकं सोमाकरविरचितं प्राचीनम्, द्वितीयं सुधाकरद्विवेदिकृतं नवीनम् एतस्य ज्योतिषशास्त्रस्य त्रीणी वर्त्मानि, तदिदं शास्त्रं त्रिस्कन्धमुच्यते–

**सिद्धान्तसंहिताहोरारूपं स्कन्धत्रयात्मकम्।**
**वेदस्य निर्मलं चक्षुर्ज्योतिश्शास्त्रमनुत्तमम्।।**

एतत्प्रवर्तकाः अष्टादश महर्षयः –

**सूर्यः पितामहो व्यासो वसिष्ठोऽत्रिः पराशरः।**
**कश्यपो नारदो गर्गः मरीचिर्मनुरङ्गिराः।।**
**लोमशः पौलिशश्चैव च्यवनो यवनो भृगुः।**
**शौनकोऽष्टादशाश्चैते ज्योतिःशास्त्रप्रवर्तकाः।।**

## वेदानां रचनाकालः

प्राचीनाः भारतीयाः विद्वांसः वेदान् अपौरुषेयान् मन्यन्ते। तेषां मते वेदरचनाकालविचारः सर्वथा निरर्थकः अस्ति। कतिपयाः पाश्चात्याः विद्वांसः यथाबुद्धिवैभवं वेदरचनाकालं निर्धारयन्ति। तान् विदुषः अनुसृत्य कतिपये भारतीयाः विद्वांसः अपि तेनैव मार्गेण वेदकालं निर्णेतुं प्रयतन्ते। अत्र तद्विषयकाः कतिचन विचाराः प्रस्तूयन्ते–

### १. मैक्समूलरमतम्–

मैक्समूलरमहोदयस्य मतेन ऋग्वेदस्य रचना ११५० ई.पू. समीपे जाता। बुद्धधर्मोदयात् प्रागेव ब्राह्मणग्रन्थेषु विवेचितयागविधीनां कटु-आलोचना क्रियते स्म, अपि च उपनिषत्समर्थितं कतिपयतत्त्वजातमात्मसात् क्रियते स्म। अत एव बुद्धात् पूर्वमेव (५०० ई.पू. प्राक्) ब्राह्मणोपनिषद्भागाः सम्भवन्ति। वैदिकसाहित्ये चत्वारि युगानि– छन्दोयुगम्, मन्त्रयुगम्, ब्राह्मणयुगम् सूत्रयुगञ्च। प्रत्येकयुगविकासे तेन वर्षशतद्वयं कालः कल्पितः। तदनुसारेण बुद्धात् ६०० वर्षतः पूर्वम् छन्दोयुगस्य अस्तित्वं समायाति। अतः ऋग्वेदस्य रचना ११५० ई.पू. समयात् पश्चात्कालिकी न सम्भवतीति।

अयं कालः मैक्समूलरमहोदयेन सम्भाव्यरूपेण उक्तः न तु निश्चयरूपेण, परं तु तमनुसृत्य पाश्चात्याः तदीयैरेव तर्कैः कालममुं निश्चयरूपेण कथयितुं प्रवृत्ताः।

### २. डॉ. अविनाशचन्द्रमतम् –

अयं महानुभावः वेदे निर्दिष्टानि अनेकानि भूगर्भशास्त्रीयतत्त्वानि आधारीकृत्य गणना द्वारा वेदस्य कालः २५ सहस्रसंवत्सरपूर्वं मन्यते। इदं मतम् 'ऋग्वेदिक इण्डिया' नामके पुस्तके स्पष्टतया प्रतिपादितम्।

### ३. शङ्करबालकृष्णदीक्षितमतम् -

वैदिकसंहितासु नक्षत्र-निर्देशकानि बहूनि वर्णनानि प्राप्यन्ते। शतपथब्राह्मणे एवम् उल्लेखः प्राप्यते-

**'एकं द्वे त्रीणि चत्वारि वा अन्यानि नक्षत्राणि, अथैता एव भूयिष्ठा यत् कृत्तिकास्तद् भूमानमेव एतदुपैति, तस्मात्कृत्तिकास्वादधीत। एता त ह वै प्राच्या दिशो न च्यवन्ते, सर्वाणि ह वा अन्यानि नक्षत्राणि प्राच्या दिशश्च्यवन्ते।'** (शतपथब्राह्मणम् २/१/२)

अनेन ज्ञायते यत् शतपथब्राह्मणरचनाकाले कृत्तिकाः नियमेन प्राच्यामासन्। सम्प्रत्येताः कृत्तिकाः पूर्वदिग्बिन्दुतः ईषदुत्तरस्यां दिशि उदयं यान्ति। दीक्षितमहोदयस्य गणनया तादृशी ग्रहस्थितिः ३००० ई.पू. काले सम्भवति। अतः स एव शतपथब्राह्मणः निर्माणकालः। तैत्तिरीयसंहिता शतपथात् प्राचीना, ऋग्वेदश्च तैत्तिरीयसंहितायाः अपि प्राचीनः। अतः ऋग्वेदस्य रचना ५०० वर्षाणि पूर्वं निश्चितरूपेण ३५०० ई.पू. काले जाता। एवञ्च सम्प्रति ऋग्वेदः ५५०० वर्षप्राचीनः इति निश्चीयते।

### ४. बालगंगाधरतिलकमतम् -

बालगङ्गाधरतिलकमहोदयस्य मते वेदरचनाकालः शङ्करबालकृष्णदीक्षितोक्तकालात् अपि प्राचीनः सिद्ध्यति। तेन हि मृगशिरानक्षत्रे वसन्तसम्पातस्य साधकानि बहूनि वेदवाक्यानि संगृहीतानि। तैत्तिरीयसंहितायाम् उच्यते- **'फाल्गुनीपूर्णिमावर्षादिः'**। तिलकमतमिदमनकूलमेव यतो यदि पूर्णश्चन्द्रः फाल्गुन्यां तदा सूर्येण मृगशिरायां भवितव्यमेव, तदेव च वसन्तसम्पातो भावी।

मृगशिरायां वसन्तसम्पातस्य कालः पूर्वोक्तकृत्तिका-कालात् प्रायः २००० वर्षाणि पूर्वं सम्भवति, यतः मृगशिरायाः कृत्तिकापर्यन्तं पश्चात् सर्पणे सहस्रद्वयाब्दी अपेक्ष्यते। अतः येषु मन्त्रेषु मृगशिरायां वसन्तसम्पातस्योल्लेखो विद्यते ते मन्त्राः ४५०० ई.पू. समयतोऽर्वाचीनाः सम्भवन्ति। एवम् तिलकमहोदयस्य मते ऋग्वेदस्य रचनाकालः ६००० वर्षपूर्वम् निर्णीतः।

जर्मनविद्वान् याकोबीमहोदयः अपि तिलकमहोदयस्य मतं पुष्णाति। तेन ऋग्वेदस्य रचनाकालः ४५०० ईशवीतः पूर्वमेव निर्धार्यते।

उपर्युक्तमतानां आलोचनेन कथयितुं शक्यते यत् वेदस्य रचनाकालस्य पूर्वसीमा ४५०० ई.पू. वर्षतः आरभ्य १५०० ई.पू. यावत् अन्तिमा स्थितिः अवश्यमेव भवितव्या।

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः–

१. वेदाः भागेषु विभक्ताः सन्ति –

(क) एकस्मिन् (ख) द्वयोः

(ग) त्रिषु (घ) चतुर्षु ( )

२. धर्ममूलम् उच्यते –

(क) पुराणानि (ख) भारतम्

(ग) धर्मशास्त्रम् (घ) वेदः ( )

३. चतुर्षु वेदेषु प्राचीनतमः वेदः अस्ति –

(क) यजुर्वेदः (ख) सामवेदः

(ग) ऋग्वेदः (घ) अथर्ववेदः ( )

४. 'अपौरुषेयं वाक्यं वेद इति' प्रोक्तम्–

(क) सायणेन (ख) महीधरेण

(ग) कैय्यटेन (घ) उव्वटेन ( )

५. ऋग्वेदः विभक्तः अस्ति–

(क) एकधा (ख) द्विधा

(ग) त्रिधा (घ) चतुर्धा ( )

६. ऋग्वेदः मण्डलेषु विभक्तः अस्ति–

(क) एकस्मिन् (ख) त्रिषु

(ग) दशसु (घ) अष्टसु ( )

७. ऋग्वेदस्य नवममण्डलस्य नाम अस्ति–

(क) पवमानमण्डलम् (ख) सवितृमण्डलम्

(ग) देवमण्डलम् (घ) ऋषिमण्डलम् ( )

८. यज्ञे ऋत्विजः भवन्ति–

(क) एकः (ख) द्वौ

(ग) त्रयः (घ) चत्वारः ( )

९. सामवेदे कति मन्त्राः सन्ति –

(क) १३५९ (ख) १८८९

(ग) १५८९ (घ) १६६९ ( )

१०. वेदानां सामवेदोऽस्मि इति प्रोक्तम्–

(क) कृष्णेन (ख) अर्जुनेन

(ग) युधिष्ठिरेण (घ) व्यासेन ( )

११. वेदान् अपौरुषेयान् मन्यन्ते–

(क) प्राचीनभारतीयविद्वांस: (ख) आधुनिकभारतीयविद्वांस:

(ग) बालगङ्गाधरतिलक: (घ) पाश्चात्यविद्वांस: ( )

१२. मैक्समूलरमते ऋग्वेदस्य रचना जाता–

(क) १५०० ई.पू. समीपे (ख) १६०० ई.पू.समीपे

(ग) ११५० ई.पू. समीपे (घ) ८०० ई.पू. समीपे ( )

१३. बालङ्गाधरतिलकमते ऋग्वेस्य रचनकाल: अस्ति–

(क) ६००० वर्षपूर्वम् (ख) ५००० वर्षपूर्वम्

(ग) ४००० वर्षपूर्वम् (घ) ३००० वर्षपूर्वम् ( )

१४. वेदस्य अङ्गानि सन्ति:–

(क) पञ्च (ख) षड्

(ग) सप्त (घ) अष्ट ( )

१५. येन वेदमन्त्राणामुच्चारणं शुद्धं सम्पाद्यते, तच्छास्त्रस्य नाम अस्ति–

(क) शिक्षा (ख) कल्प:

(ग) छन्द: (घ) व्याकरणम् ( )

## लघूत्तरात्मकप्रश्ना :

१. ऋग्वेदस्य परिचय: संक्षेपेण लिखत?

२. वेदानां रचनाकालविषये विदुषां मतं संक्षेपेण लिखत?

३. वेदाङ्गानि कति सन्ति? संक्षेपेण वर्णयत?

## निबन्धात्मकप्रश्ना:

१. यजुर्वेदस्य भेदविषये पौराणिकमतं विवेचयत?

२. सामवेदस्य महत्त्वं स्पष्टयत?

३. अथर्ववेदस्य वर्ण्यविषयं संक्षेपरूपेण प्रतिपादयत?

४. वैदिकसाहित्यस्य पूरकसंहिता: आधारीकृत संक्षेपेण विवेचनं कुरुत?

## वस्तुनिष्ठप्रश्ना:–उत्तरमाला

(१) घ (२) घ (३) ग (४) क (५) ख (६) ग (७) क (८) घ (९) ग (१०) क (११) क (१२) ग (१३) क (१४) ख (१५) क

❀ ❀ ❀

## ( ब ) लौकिकसाहित्यम्

### ( क ) प्रमुख-नाटकानि –

### प्रतिज्ञायौगन्धरायणम्

महाकविना भासेन विरचितं 'प्रतिज्ञायौगन्धरायणम्' प्रसिद्धं नाटकमस्ति। अस्य नाटकस्य कथानक: 'स्वप्नवासवदत्तम्' इत्यस्य पूर्वभाग: विद्यते। अस्मिन् नाटके यौगन्धरायणनामामात्यस्य स्वामिभक्तं चरित्रं नितान्तमेव मन: आवर्जयति। चतुर्षु अङ्केषु विभक्तमिदं नाटकं प्रकरणरूपमस्ति। अस्मिन् वत्सराजोदयनेन सह उज्जयिनीनरेशस्य महासेनस्य पुत्र्या: वासवदत्ताया: गुप्तपरिणयस्य वर्णनं तथा च मन्त्रियौगन्धरायणस्य बुद्धिवैभवस्य वीरतायाश्च वर्णनं कृतमस्ति।

महासेनस्य कारागृहात् उदयनस्य उन्मोचनाय यौगन्धरायण: यां नीतिमाचरति सा सातिशयेन श्लाघनीय: अस्ति। महाकवेरिदं निखिलमपि विधानं हृदयहारकमस्ति। एतेन सहैव महासेनस्य राजप्रासादस्य दृश्यमपि कथमपि न्यूनं नास्ति। एतद्धि स्वीयेन सौन्दर्येण सर्वेषां चेतांसि चोरयति। नाटकस्यास्य कथावस्तु इत्थमस्ति –

वत्सदेशोद्भव: उदयन: रूपयौवनसम्पन्न: विशालकुलसम्भव: विदित-वेदितव्य: अधीतसर्वशास्त्र: राजकुमार: अस्ति। प्रद्योत: सेनाप्राचुर्यात् महासेननाम्ना प्रथित: अस्ति। तस्य पुत्री वासवदत्ता युवावस्थोपेता सुरूपा सगुणा विवाहयोग्या अस्ति। 'सुयोग्यवराय कन्या देया' इति चिन्तापरायणो प्रद्योत: आखेटाय स्वकीये नागवने प्रविष्टमुदयनं वशीकर्तुं 'नीलकुवलयतनु' नामकं कृत्रिमं गजं तत्र स्थापयति। उदयन: तत्र आखेटाय याति प्रद्योतसैनिकैश्च बन्दीभवति ।

यौगन्धरायण: एतद् वृत्तं निशम्य चिन्तित: भवति। राजमाता अपि स्वतनयस्य इमां दशां श्रुत्वा दु:खिता भवति। किन्तु सा जानाति यत् यौगन्धरायण: सुयोग्य: कुशल: अनुभवशील: स्वामिभक्त: अस्ति। अत: सा तं स्वकीयं पुत्रं शत्रुकारागारात् मोचयितुं कथयति। यौगन्धरायण: प्रतिज्ञामाचरति। दैवयोगात् पार्श्ववर्तिराज्ञ: अन्त:पुरे प्रविश्य स्वकार्यनिष्पादने समर्थो भवेत्।

द्वितीय अङ्के प्रद्योत महाराज्ञा अङ्गारवत्या वासवदत्ताया: विवाहाय मन्त्रणां करोति। तदैव कञ्चुकी तत्र प्रविश्य प्रसन्नतातिरेकेण 'गृहीतो वत्सराज:', इत्यस्य स्थाने वत्सराज: इत्येव ब्रवीति। तदनन्तरम् उदयनस्य घोषवती वीणाऽपि तत्र आनीयते। प्रद्योत: इमां वीणां वासवदत्तायै प्रयच्छति। महाराज्ञी अङ्गारवती निश्चयं करोति यत् वत्सराज एव सुयोग्य: वर: वासवदत्तायै।

तृतीय अङ्के वत्सराजस्य मन्त्रिण: तं कारागारद् मोचयितुं योजनां कुर्वन्ति। उदयनस्तत्र कथमपि वासवदत्तामवलोक्य तां प्रति अनुरक्त: भवति। स वसन्तकं सूचयति यत् वासवदत्तां विना कारागारात् बहिरागन्तुं न मे मन:। यौगन्धरायण: घोषवती वीणां नीलगिरिनामकं गजं वासवदत्तया सह उदयनं च स्वदेशे आनयनाय प्रतिज्ञां करोति।

चतुर्थे अङ्के वत्सराज: वासवदत्तया सह भद्रवती नाम्नीं हस्तिनीमारूह्य पलायते। प्रद्योतस्य सेना यौगन्धरायणस्य सेनामाक्रामति।

दुर्भाग्यवशात् यौगन्धरायणस्य कृपाण: खण्डित: भवति, शत्रवश्च तं अधिगृह्णन्ति। प्रद्योतस्य मन्त्री यौगन्धरायणेन उदयनस्य पलायनकर्मण: निन्दां करोति। कञ्चुकी महासेनद्वारा भृङ्गारनामकं सुवर्णपात्रं उपायनरूपेण राजभक्ताय यौगन्धरायणाय आनयति। यौगन्धरायण: प्रथमं तत् न गृह्णाति किन्तु यदा स जानाति यत् प्रद्योतेन वासवदत्ताया: उदयनस्य च विवाह: चित्रफलके सम्पादित: तदा स सहर्षमुपायनं स्वीकरोति। अन्तत: मेलनं भवति। भरतवाक्येन च नाटकं पूर्णतां प्राप्नोति।

## विक्रमोर्वशीयम्

नाट्यकलाविकासदृष्ट्या 'विक्रमोर्वशीयम्' तु 'मालविकाग्निमित्रम्' नाटकस्य पश्चात् कालिदासस्य द्वितीयं नाटकम् अस्ति। पञ्चसु अङ्केषु विभक्तेषु अस्मिन् त्रोटके (उपरूपके) पुरुरवा -उर्वश्यो: पौराणिककथा वर्णिता अस्ति। इयं कथा 'मत्स्यपुराणे' प्राप्यते। अङ्कानुसारेण कथावस्तु एवम् अस्ति-

प्रथम: अङ्क: - उर्वश्या: शिवसेवानन्तरं कैलाशपर्वतात् इन्द्रलोकनिवर्तनम्, मार्गे 'केशी' नामकेन दैत्येन उर्वश्या: पीडनम्, उर्वश्या:, करूण-क्रन्दनं श्रुत्वा राज्ञा पुरुरवाद्वारा तस्या: रक्षणम्, द्वयो: मध्ये परस्परानुरागस्य प्रारम्भ:।

द्वितीय: अङ्क:- राजा पुरुरवाविदूषकयो: मध्ये उर्वशीविषयकस्य प्रेम्ण: वार्तालापम् उर्वश्या: तस्या: च सख्या: प्रेम्ण: वार्तालापश्रवणम्, उर्वश्या: प्रेमपत्रलेखनम् ।

तृतीय:अङ्क: - भरतमुने: शापप्रसङ्ग:। इन्द्रकृपा शापस्य अवधे: पुरुरवापुत्रदर्शनपर्यन्तं निर्धारणम् उर्वश्या: (पुरूरवा) नाटकनायकेन सह प्रेमपूर्वकं निवास:।

चतुर्थ: अङ्क:- उर्वश्या: कार्तिकेयस्य गन्धमादनवनं प्रति गमनम्, तत्र तस्या: लतारूपेण परिवर्तनम् वियोगे पुरुरवाविलपनम्, आकाशवाण्या पुरुरवाहेतो: सङ्गमनीयमणियुक्ताया: लताया: आलिङ्गनाय आदेश:, पुन: तस्या लताया: उर्वशीरूपेण परिवर्तनम्।

पञ्चम: अङ्क:- राज्ञ: पुत्रोत्पत्तिसूचना, उर्वश्या: विषाद:, इन्द्रलोकात् नारदस्य आगमनम्, इन्द्रस्य आदेशकथनम् यत् उर्वश्या: सदा सर्वदा पुरूरवासहधर्मिणीरूपेण निवास: भविष्यति इति।

इत्थं कलादृष्ट्या विक्रमोर्वशीयस्य स्थानम् मालविकाग्निमित्रस्य अभिज्ञानशाकुन्तलस्य च मध्ये स्थितम् अस्ति। कविना स्वप्रतिभया एकस्मिन् पौराणिके कथानके महत्त्वपूर्णं परिवर्तनं कृत्वा नवीनं रूपं प्रदत्तम्। भरतमुनिना उर्वश्या: मृत्युलोके गमनस्य शाप: कार्तिकेयस्य उपवने उर्वश्या: लतारूपेण परिवर्तनम्, एतेन परिवर्तनेन पुरुरवाविलाप: इत्यादिना कतिपयेन नवेन अनुसंधानेन अस्य नाटकस्य रोचकता परिवर्धते।

अस्मिन् नाटके शृङ्गारस्य सर्वासु दशासु अत्यन्तं मार्मिकं चित्रणं कृतमस्ति। अत्र संयोगविप्रलम्भयो: उत्तम: परिपोष: दृश्यते। यद्यपि 'विक्रमोर्वशीयम्' इत्यस्य भाषा अभिज्ञानशाकुन्तलमिव परिष्कृता नास्ति, तथापि सा प्रसादगुणोपेता सौष्ठवयुक्ता अलंकृता चास्ति। अस्य नाटकस्य लघुछन्दस: माधुर्यं वैविध्यं च निदर्शनरूपेण दर्शनीयम्।

उर्वश्याः अप्रतिमरूपत्वं दृष्टवा राजा मनसि एवं विचारयति–

**अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः**
**शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः।**
**वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो**
**निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः।।**

कालिदासस्य उपमाकौशलमपि अत्र विशेषरूपेण प्रस्फुटिमस्ति। उर्वश्याः मूर्च्छितदशायाः चेतनदशायाम् आगमनस्य अत्यन्तं मार्मिकं वर्णनं प्राप्यते–

**आविर्भूते शशिनि तमसा मुच्यमानेव रात्रि-**
**नैशस्यार्चिर्हुतभुज इव छिन्नभूयिष्ठधूमा।**
**मोहेनान्तर्वरतनुरियं लक्ष्यते मुक्तकल्पा**
**गङ्गारोधः पतनकलुषा गच्छतीव प्रसादम्।।**

काव्यसौन्दर्यदृष्ट्या विक्रमोर्वशीयस्य चतुर्थः अङ्कः अप्रतिमः अस्ति। तस्य प्राकृतपद्यानां गीतिसौन्दर्यं, प्रकृतिवर्णनं प्रेमीजनस्य विरहव्यथावर्णनं च समग्ररूपेण मेघदूतस्य पूर्वचित्रम् प्रस्तुतं कुर्वन्ति। नाट्यदृष्ट्या अपि इदं नाटकं सफलम् अस्ति।

## मुद्राराक्षसम्

'मुद्राराक्षसम्' नाम नाटकम् महाकविना विशाखदत्तेन विरचितम् अस्ति। कविना विशाखदत्तेन रचितम् अपरं नाटकं 'देवीचन्द्रगुप्तम्' अन्येषु ग्रन्थेषु उद्धरणरूपेण प्राप्यते न तु स्वतंत्ररूपेण। 'मुद्राराक्षसम्' नाम नाटकमेव केवलं स्वतन्त्ररूपेण उपलभ्यते। इदमेव नाटकम् विशाखदत्तस्य प्रसिद्धेः आधारभूतम् अस्ति। अस्य नाटकस्य प्रस्तावनायां कविना स्ववंशपरिचयं प्रस्तुवन् स्वं बटेश्वरदत्तस्य पौत्रं पृथोः पुत्रम् च घोषितम् –

"अद्य सामन्तबटेश्वरदत्तपौत्रस्य महाराजपदभाक्पृथुसूनोः कवेर्विशाखदत्तस्य कृतिः मुद्राराक्षसं नाम नाटकं नाटयितव्यम्।"

परं तु इतिहासे 'बटेश्वरदत्तः' नामकस्य अथवा 'पृथुः' नामकस्य राज्ञः वर्णनं न प्राप्यते। अतएव विशाखदत्तविषये स्पष्टरूपेण कश्चिदपि निर्णयः सम्भवः नास्ति।

मुद्राराक्षसस्य रचनाकालगणनाप्रसङ्गे मतत्रयं विद्यते। अस्य भरतवाक्ये (अन्तिमश्लोके) 'दन्तिवर्मा', 'अवन्ति वर्मा', 'चन्द्रगुप्त' इति पाठैः त्रीणि अपि मतानि पुष्णन्ति। आचार्यरामचन्द्रमिश्रेण एवम् उल्लेखः कृतः।

'दन्तिवर्मा दक्षिणदेशे पल्लवनरेशो हि ७२० तमे खीष्टाब्दे भूमिं प्रशासत, परं तु अस्मिन् समये म्लेच्छोपद्रवः नासीत् इति भरतवाक्यम् न अन्वेति।

द्वितीय: चन्द्रगुप्त: ३७५-४१३ ख्रीष्टाब्दकाले आसीत् इति तस्मिन्नेव काले विशाखदत्तस्य समय: इति जायसवाल: (इदमपि मतं न तथ्यं, यत: चन्द्रगुप्तकालात् ५० वर्षत: परत: हूणानाम् आक्रमणम् अजायत अतो न भरतवाक्यसङ्गति:)। अवन्तिवर्मा एक: काश्मीरक:, अपरश्च कान्यकुब्जशासिता मौखरिवंश्य:। अस्यैव पुत्रो ग्रहवर्मा, महाराज-हर्षवर्धनस्य भगिनीं राजश्रियं परिणीतवान्। अस्यैव समये विशाखदत्त: मुद्राराक्षसं विरचितवान् इति मतमेव इतिहाससमर्थितं यत: अस्मिन्नेव काले हूणानां उपद्रव: पश्चिमोत्तरभारते अजायत। इयं घटना ५८२ ख्रीष्टाब्दसमीपे जाता, अत: मुद्राराक्षसस्य प्रणयनकाल: षष्ठशताब्दी सिद्ध्यति।''

प्रायेण बहुभि: विद्वद्भि: विशाखदत्तस्य अयमेव: काल: समर्थ्यते।

**कथानकम् –**

'मुद्राराक्षसम्' सम्पूर्णे संस्कृतसाहित्ये एका विलक्षण नाट्यकृति: विद्यते। सप्तसु अङ्केषु इदं नाटकं राजनीतिप्रधानं कूटनीतिसमाविष्टं चास्ति। अस्य कथावस्तु, क्लिष्टा कूटनीतियुक्ता चास्ति। अस्मिन् नाटके चाणक्य: मगधराजस्य नन्दस्य मन्त्रिण: राक्षसस्य च मुद्रया विविधानि कार्याणि करोति।

अतएव 'मुद्राराक्षसम्' नाम सार्थकम् अस्ति। अङ्कानुसारेण कथानकं संक्षेपेण एवम् अस्ति-

**प्रथमोऽङ्क:–** नान्दीपाठप्रस्तावनानन्तरं चाणक्यस्य प्रवेश: भवति। तेन नन्दवंशं विनाशयितुं कृतप्रतिज्ञावर्णनं राक्षसं वशीकर्तुं संकल्पश्च। चाणक्यस्य स्वगुप्तचरेण निपुणकेन राक्षसस्य मुद्राप्राप्ति: वर्णितास्ति।

**द्वितीयोऽङ्क:–** राक्षसस्य कूटनीते: असफलताया: वर्णनम्। चन्द्रगुप्त-चाणक्ययो: मध्ये विभाजनप्रयासवर्णनम् विफलत्वं च वर्णितम्।

**तृतीयोऽङ्क:–** चन्द्रगुप्तचाणक्ययो: छद्मकलहस्य मतभेदस्य च वर्णनम्।

**चतुर्थोऽङ्क:–** मलयकेतो: कपटमित्रस्य भागुरायणस्य कपटयोजनाया: वर्णनम्, राक्षसेन स्वयोजनायां विफलताया: ज्ञानम्, नन्दवंशसिंहासने राक्षसेन चन्द्रगुप्तं निवार्य मलयकेतो: आसीनं कर्तुं प्रयास:।

**पञ्चमोऽङ्क:–** मलयकेतो: राक्षसे अविश्वासर्णनम्, चाणक्यस्य कूटनीते: उत्कर्षवर्णनं राक्षसस्य विरोधेन मलयकेतो: स्वसामन्तै: सह बन्धनम् ।

**षष्ठोऽङ्क:–** चाणक्येन समस्तशत्रुदलोपरि यूक्तिपूर्वकं स्ववशीकरणवर्णनम्, राक्षसस्य सैन्यशिविरात् निर्गत्य पाटलिपुत्रे आगमनम्, तत्र जीर्णोद्याने गुप्तरचरेण राक्षसस्य अनुगमनम्, स्वमित्रस्य चन्दनदासस्य मृत्युदण्डं श्रुत्वा मित्रस्य रक्षार्थं प्रस्थानम् वर्णितम्।

**सप्तमोऽङ्क:–** चाणक्यस्य कूटनीते: साफलस्य राक्षसस्य असाफल्यस्य च वर्णनम्, विवशीभूय राक्षसेन चन्द्रगुप्तस्य मन्त्रित्वस्य स्वीकरणम्, मलयकेतो: स्वराज्यप्राप्ति: चन्दनदासस्य नगरश्रेष्ठपदस्य प्राप्ति:, प्रतिज्ञापूर्त्यनन्तरं चाणक्येन स्वशिखाबन्धनम्, भरतवाक्येन नाट्यसमाप्तिश्च।

**मुद्राराक्षसस्य वैशिष्ट्यम् –** मुद्राराक्षसे कतिपयानि एतादृशानि वैशिष्ट्यानि सन्ति यानि अन्येषु संस्कृतनाटकेषु न उपलभ्यन्ते। तानि द्रष्टव्यानि–

१. 'मुद्राराक्षसम्' पूर्णतया राजनीतिप्रधानं नाटकमस्ति यस्य आधार: ऐतिहासिक: विद्यते।

२. अत्र अङ्कानामपि विभाजनं दृश्येषु उपलभ्यते। तृतीये अङ्के नैकदृश्यपरिवर्तनं स्पष्टरूपेण ज्ञायते।

३. स्त्रीपात्राणां पूर्णतया अभाव: वर्तते, अतएव शृङ्गाररसस्य अभिव्यञ्जना कुत्रापि न दृश्यते।

४. मुद्राराक्षसं विशुद्धं घटनाप्रधानं नाटकमस्ति, अत: कस्यापि रसविशेषस्य विशिष्टता न प्रतीयते। दशरूपककारेण धनञ्जयेन 'नाटकं रसाश्रितं भवेत्' एतद्दृष्ट्या इदं नाटकं वीररसप्रधानं नाटकम् अस्ति।

५. विशाखदत्तेन अस्मिन् नाटके धीरोदात्त: क्षत्रिय: चन्द्रगुप्त: नायकरूपेण न स्वीकृत: अपितु ब्राह्मण: चाणक्य: नायकरूपेण स्वीकृत:।

६. अस्मिन् नाटके विदूषकस्य अभाव: विद्यते। अतएव हास्यस्य अभाव:, फलत: सर्वत्र गम्भीरं वातावरणं दृश्यते।

७. वास्तविकरूपेण इदं नाटकम् आद्यन्तं ओजस्वितायाः, पौरुषतायाः, तेजस्वितायाः च ओत-प्रोतम् अस्ति।

८. कार्यान्वितिदृष्ट्या अपि इदं नाटकं सफलतम् अस्ति। अत्र मित्रतायाः चित्रितानि, घटनानिर्वहणे च समर्थानि सन्ति।

९. नाट्यशास्त्रदृष्ट्या अस्मिन् नाटके सर्वेषाम् अपेक्षितानां नाट्यतत्त्वानां यथास्थाने समावेश: प्राप्यते। कथावस्तु-विकासदृष्ट्या पञ्चार्थप्रकृतीनां पञ्चावस्थानां च यथास्थाने निर्देश:, पञ्चसन्धीनामपि सम्यक्प्रयोग: विहित:। नान्दी-प्रस्तावनायुक्ता इयं कृति: कवे: विशाखदत्तस्य अपेक्षितसर्वनाट्यगुणान्विता सफला कृति: अस्ति।

१०. मुद्राराक्षसस्य रचनायाम् उत्कृष्टा कलात्मकता अस्ति। कविना पदे-पदे औचित्यविचार: कृत:।

**भाषाशैली–**

भाषाशैलीदृष्ट्या अपि इदं नाटकं श्रेष्ठम् अस्ति। नाटककारेण समय-परिस्थिति-पात्रानुसारेण भाषा-प्रयोग: कृत:। शब्दचयनम्, शब्दविन्यास: स्वाभाविक: आडम्बरविहीनश्च अस्ति। भावानुकूलै: सर्वत्र शब्दानां प्रयोग: कृत: परं तु मन्त्रणाकाले सुन्दर-सरस शब्दानां प्रयोग:। कथोपकथनं संक्षिप्तं परं तु सारगर्भितम् अस्ति। अत्र संस्कृतभाषाया: अतिरिक्तं नाटककारेण शौरसेनी-महाराष्ट्र-मागधी-प्राकृतभाषाया: प्रयोग: कृत:, यत् संस्कृतनाटकेषु आवश्यकमस्ति।

महाकवे: विशाखदत्तस्य शैली विषयानुरूपेण गाम्भीर्येण ओत-प्रोतम् अस्ति। शैल्या: गाम्भीर्येण कवे: कविताकामिनी मन्दमन्थरगत्या चलति। कवे: पदावलि: सशक्ता, प्रवाहमयी स्वाभाविका चास्ति। उदाहरणं द्रष्टव्यम् अस्ति –

**आस्वादित-द्विरद-शोणित-शोण-शोभां,**
**सन्ध्यारूणामिव कलां शशलाञ्छनस्य ।**
**जृम्भाविदारित-मुखस्य मुखात् स्फुरन्तीं**
**को हर्तुमिच्छति हरेः परिभूय दंष्ट्राम्।।**

विशाखदत्तस्य शैल्यां कुत्रापि कृत्रिमता नास्ति। काव्योचिता उदात्तता सर्वत्र विद्यमाना अस्ति। वीररसस्य परिपाकं अत्यन्तं रमणीयम् अस्ति। गौडीरीतेः प्रयोगेण वीररसस्य अभिव्यञ्जना आकर्षिका–

अलङ्कारेषु उपमा-रूपक-श्लेष-अर्थान्तरन्यास-अप्रस्तुतप्रशंसा-समासोक्तीत्यादीनां अलङ्काराणां प्रयोगः सफलतापूर्वकः कृतः अस्ति। व्यंग्यार्थप्रतीतिः नाटककारेण श्लेषद्वारा अतिकुशलतया अभिव्यञ्जिता। छन्दस्सु शार्दूलविक्रीडितं-स्रग्धरा-वसन्ततिलका-शिखरिणी- अनुष्टुप्-आदीनां सम्यक् प्रयोगः विहितः।

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः–

१. 'प्रतिज्ञायौगन्धरायणम्' नाट्यकृतिः कस्य रचना अस्ति ?

(क) कालिदासस्य (ख) भासस्य
(ग) बाणस्य (घ) भवभूतेः ( )

२. स्वप्नवासवदत्तायाः पूर्वभागम् अस्ति ?

(क) उत्तररामचरितम् (ख) प्रतिज्ञायौगन्धरायणम्
(ग) महावीरचरितम् (घ) वेणीसंहारम् ( )

३. 'विक्रमोर्वशीयम्' इत्यस्य रचनाकारस्य नाम किम् ?

(क) भासः (ख) बाणभट्टः
(ग) कालिदासः (घ) भवभूतिः ( )

४. 'विक्रमोर्वशीयम्' इति नाटकस्य कथा पूर्वरूपेण कुत्र प्राप्यते?

(क) विष्णुपुराणे (ख) अग्निपुराणे
(ग) मत्स्यपुराणे (घ) वायुपुराणे ( )

५. 'देवीचन्द्रगुप्तम्' इत्यस्य रचनाकारः अस्ति?

(क) कालिदासः (ख) बाणभट्टः
(ग) विशाखदत्तः (घ) भासः ( )

### अतिलघूत्तरात्मक प्रश्नाः–

१. 'प्रतिज्ञायौगन्धरायण' नाटकम् कतिषु अङ्केषु विभक्तं अस्ति?

२. विक्रमोर्वशीयम् नाटके कस्य रसस्य प्रमुखरूपेण वर्णनम् अस्ति ?

३. मुद्राराक्षसस्य रचनाकारः कः अस्ति ?

४. 'मुद्राराक्षसम्' इति नाटकं कतिसु अङ्केषु विभक्तं अस्ति ?

### लघूत्तरात्मक प्रश्नाः–

१. प्रतिज्ञायौगन्धरायणम् इत्यस्य कथासारं संक्षेपेण लिखत।

२. मुद्राराक्षसस्य वैशिष्ट्यं संक्षेपेण लिखत ।

### निबन्धात्मक प्रश्नाः–

१. भाषाशैलीदृष्ट्या 'मुद्राराक्षसम्' इत्यस्य नाटकस्य समीक्षणं कुरुत ?

२. 'विक्रमोर्वशीयम्' इति नाटकस्य कथासारं वैशिष्ट्यं च लिखत ?

### वस्तुनिष्ठप्रश्नाः-उत्तरमाला

१. (ख) २.(ख) ३. (ग) ४. (ग) ५. (ग)

❀ ❀ ❀

## ( ख ) गद्यकाव्यानि–

संस्कृते पद्यसाहित्यमिव गद्यस्य प्रयोगः अपि वैदिककालादेव भवति। कृष्णयजुर्वेदः ब्राह्मणग्रन्थाः, उपनिषदश्च अधिकांशतः गद्ये एव वर्तन्ते। यद्यपि संस्कृतसाहित्ये गद्ये ग्रन्थितानां ग्रन्थानां संख्या अंगुलिगणनीयाः एव वर्तन्ते, तथापि पद्यस्य अपेक्षया गद्यस्य महत्त्वं प्रतिपादयितुं संस्कृतस्य प्राचीनैः आचार्यैः एषा सूक्तिः प्रसारिता– **'गद्यं कवीनां निकषं वदन्ति'।** गद्यस्य महत्त्वं एतस्मादेव कारणात् वर्तते यत् गद्यकाव्यरचना अतिकठिना अस्ति।

लौकिकगद्यस्य दर्शनं सर्वप्रथमं महाभारते एव विद्यते। गद्ये एव अर्थशास्त्रं तथा महाभाष्यादयः ग्रन्थाः उपलभ्यन्ते। पुराणानां गद्यं साधारणकोटिकं वर्तते। साहित्यशास्त्रकर्तृणां दार्शनिकानां च गद्यं पारिभाषिकं अत्यन्तं कठिनं चास्ति। चम्पूकाव्यमपि गद्यकाव्ये एव परिगण्यते। नवविधस्य उपन्यासस्य अपि गणना गद्यसाहित्ये एव भवति।

संस्कृतगद्यकाव्यं ओजः गुणोपेतं समासबहुलं चास्ति। उक्तं हि दण्डिना–

**'ओजः समासभूयस्त्वमेतद् गद्यस्य जीवितम्।'**

काव्यस्यातिदीर्घान् समासान्, दुर्बोधान् घटनासंकेतान्, श्लेषयमकानुप्रासोपमोत्प्रेक्षापरिसंख्यादीन् अलंकारान् प्रयोक्तुं अत्र पूर्णा स्वतंत्रता वर्तते। प्रकृतेः सूक्ष्मचित्रणस्य स्त्रीपुरुषयोः नैतिकमानसिकशारीरिकगुणानामेव वर्णनस्य प्राधान्यमत्र वर्तते। गद्यकाव्यं प्राचीनैः आलङ्कारिकैः द्विधा विभक्तम्– आख्यायिका कथा च।

प्राचीनकाले गद्यकाव्यस्य परिमितसंख्यायाः किं कारणमस्ति इत्येषः प्रश्नः। इदं सत्यं यत् संस्कृते गद्यकाव्यस्य संख्या परिमिता एवास्ति, तथापि नैकगद्यकाव्यानामुल्लेखो साहित्ये अस्ति। पद्ये मादकापूर्णः श्रुतिमाधुर्यगुणः वर्तते, परं गद्ये ईदृग्विधस्य गुणस्य नोपलब्धिः। एतेन सार्धमेव समासबाहुल्येन गद्यकाव्यमधिगन्तुम् अतिदुष्करम् आसीत्, एतस्मादेव कारणात् गद्यरचनायां कवीनां प्रवृत्तिः बहुला नासीत्।

संस्कृतगद्यकाव्ये कवित्रयस्य प्रामुख्यम् अस्ति–सुबन्धुः, बाणभट्टः, दण्डी च । एतेषां काव्येषु गद्यस्य चरमोत्कर्षः प्राप्यते। एतेषां रचनासु एव सर्वप्रथमं वास्तविकस्य गद्यस्य दर्शनं भवति।

एतस्मात् बहुकालात् पूर्वमेव शिलालेखेषु गद्यस्य साहित्यप्रयोगः प्रथमतया कृतः प्रतीयते।

रुद्रदाम्नः शिलालेखे हरिषेणस्य च प्रयागप्रशस्तौ विजयस्तम्भवर्णने अखिन्नगद्यशैलीनिदर्शनं पूर्णरूपेण भवति, यथा हरिषेणस्य प्रयागप्रशस्तौ –

**''सर्वपृथिवीजयजनितोदयव्याप्तनिखिलावनितलां कीर्तिमितस्त्रिदशपति-भवनगमनावाप्तललितसुखविचरणामाचक्षाण इव भुवोर्बाहुरयमुच्छ्रितः स्तम्भः।''**

हरिषेणस्य शिलालेखे प्रयागप्रशस्तौ च गद्यस्य यद्रूपं प्राप्यते तदेव अग्रेतनैः कविभिः परिमार्जितं सत् साहित्यिकगद्यस्य गौरवं वर्धयितुं प्राक्रमत। साहित्यिकगद्यस्य आद्यः ग्रन्थः सुबन्धोः वासवदत्ता एव उपलभ्यते।

## वासवदत्ता

'वासवदत्ता' नामकः एकः एव ग्रन्थः सुबन्धुकृतत्वेन प्राप्यते। अयमेव ग्रन्थः सुबन्धेः प्रसिद्धेः आधारः अस्ति। अस्य सुबन्धोः समयः क? इति अत्र विचार्यते–

१. अयं सुबन्धुः स्वग्रन्थे विक्रमादित्यं स्मरति –

**सा रसवत्ता विहता नवका विलसन्ति चरति नो कङ्कः।**
**सरसीव कीर्तिशेषं गतवति भुवि विक्रमादित्ये।।**

परं तु सः कतमो विक्रमादित्यः अस्मिन् प्रसङ्गे बहवः आलोचकाः मिहिरकुलनामकस्य हूणराजस्य पराजेता बालादित्यसखा यशोधर्मा एवायं विक्रमादित्यः इति निर्णयन्ति। यशोधर्मणः समयश्च षष्ठशतकस्य मध्यभागः इति निर्णयन्ति। एतेन सुबन्धोः समयः षष्ठशतकस्य मध्यभागः इति निर्णयन्ति। एतेन सुबन्धोः समयः षष्ठशतकस्य पूर्वभागः इति वक्तुं शक्यते।

२. बाणभट्टः सुबन्धोः कथां धिया निबद्धेयमतिद्वयी कथा इत्येवं स्मरति। बाणः सप्तमशतकोत्पन्नः इति, ततः पूर्ववर्तित्वेन सुबन्धोः षष्ठशतकपूर्वभागभवत्वं युज्यते एव।

३. सुबन्धुना स्ववासवदत्तायां श्लेषद्वारा उद्योतकरं स्मर्यते–न्यायस्थिति–मिवोद्योतकरस्वरूपाम्। अस्योद्योतकरस्य समयः षष्ठसप्तमशताब्द्योरन्तकाले मन्यते। एभिः निदर्शनैः सुबन्धोः समयः षष्ठशतकं मन्यते। आचार्येण बलदेवापाध्यायेनापि विविधैः प्रमाणैः सुबन्धोः समयः षष्ठशतक एव निश्चितः, यः सर्वथा युक्तः अस्ति।

### कथानकम्–

सुबन्धोः वासवदत्तायाः सम्बन्धः प्राचीनभारतस्य आख्यायिकायाः वासवदत्तायाः उदयनस्य प्रणयकथायाः च सर्वथा भिन्नः अस्ति। अस्याः सम्पूर्णं कथानकं कवेः मस्तिष्कस्य कल्पना अस्ति।

'राज्ञः चिन्तामणेः पुत्रस्य राजकुमारस्य कन्दर्पकेतोः स्वप्ने एका परमसुन्दरी कन्या आयाति। तस्याः अन्वेषणे कन्दर्पकेतुः स्वमित्रेण मकरन्देन सह सहसा निर्गच्छति। रात्रौ सः विन्ध्यवने तिष्ठति यत्र वृक्षस्थितसारिका ज्ञायते यत् पाटलिपुत्रस्य राजकुमारी स्वप्ने कन्दर्पकेतुं अपश्यत्। तस्य कन्दर्पकेतोः अन्वेषणे सारिका तमालिका च संलग्ने स्तः। एवंविधया शुकदम्पतीद्वारा नायकनायिकयोः मेलनं भवति। उभयोः हृदये परस्परं प्रगाढानुरागः अस्ति, परं तु वासवदत्तायाः पिता शृङ्गारशेखरः तस्याः विवाहं केनचित् विद्याधरेण सह कर्तुम् इच्छति। अस्मात् कारणात् वासवदत्ता कन्दर्पकेतुना सह विन्ध्याट्व्यां पलायनं करोति। तत्र कन्दर्पकेतुं विना एकाकीरूपेण वने भ्रमणार्थं गच्छति सा। तां प्राप्त्यर्थं किरातानां समूहद्वये संघर्ष भवति। वासवदत्ता गुप्तरूपेण कस्यचित् ऋषेः आश्रमे प्रविशति, यत्र सा ऋषिशापवशात् शिलारूपेण परिवर्तिता भवति। अपरतः कन्दर्पकेतुः वासवदत्तावियोगे आत्महत्यां कर्तुम् उद्यतः भवति, परं तु आकाशवाण्या सः विरमति। अन्ततोगत्वा सः वने तस्याः अन्वेषणं करोति, यत्र कन्दर्पकेतोः स्पर्शद्वारा सा मानुषीरूपं धारयति। अतः परं मकरन्दः तत्र आगच्छति। सर्वे राजधान्यां निवर्त्य सुखपूर्वकं जीवनयापनं कुर्वन्ति इति।'

अस्याः वासवदत्तायाः कथा अतिस्वल्पा निर्जीवा चास्ति, परं तु कविना सुबन्धुना स्वप्रतिभया सुन्दरवर्णनेन हृदयावर्जिका कृता।

### काव्यवैशिष्ट्यम्-

अस्याः वासवदत्तायाः प्रशंसायां बाणभट्टः लिखति हर्षचरिते-

**कवीनामगलद्दर्पो नूनं वासवदत्तया।**
**शक्त्येव पाण्डुपुत्राणां नूनं वासवदत्तया।।**

शबदार्थालङ्काररससौष्ठवैः वासवदत्तायाः तुलायां कोऽपि अन्यो गद्यग्रन्थो नास्तीति तद् अध्ययनेन प्रतिभासते। तत्र शब्दसौष्ठवं यथा-'अभूदभूतपूर्वः सर्वोर्वीपतिचक्र-चूडामणि-श्रेणीशाणकोणकषणनिर्मली कृतचरणनखमणिनृसिंह इव दर्शितहिरण्यकशिपुक्षेत्रदानविस्मयः, कृष्ण इव कृतवसुदेवतर्पणः, नारायण इव सौकर्यसमासादितधरणिमण्डलः, कंसारातिरिव जनितयशोदानन्दसमृद्धिः। विरोधाभासः यथा- विद्याधरोऽपि सुमनाः धृतराष्ट्रोऽपि गुणप्रियः, क्षमानुगतोऽपि सुधर्माश्रितः, बृहन्नलानुभावोऽप्यन्तः सरलः, महिषीसभवोऽपि वृषोत्पाद्यः, तरलोऽपि महानायको राजा चिन्तामणिर्नाम। परिसंख्या यथा-'छलनिग्रहप्रयोगो वादेषु, नास्तिकता चार्वाकेषु, कण्टकयोगो नियोगेषु, खलसंयोगः शालिषु द्विजिह्वसङ्गृहीतिराहितुण्डिकेषु, नेत्रोत्पाटनं मुनीनाम्, द्विजराजविरुद्धता पङ्कजानाम्, सूचीभेदो मणीनाम्।'

वासवदत्तायाः आख्यायिकाग्रन्थतया कतिचन श्लोका अपि यत्र तत्र निवेशिताः सन्ति यैः सुबन्धोः पद्यप्रणयनपाटवं प्रकटीभवति।

इदं सत्यं यत् एवंप्रकारकः वाक्यविन्यासः क्लिष्टतां भजते कृत्रिमतामाश्रयति, वाचकान् क्लिश्नाति तथापि कल्प्राप्रौढिशब्दचयनालङ्काररसज्जाभिः अयं कविः सकलहृदयस्तुत्यः इति निर्बाधं वक्तुं शक्यते।

यद्यपि बाणस्य इव रमणीयार्थप्रतिपादनसमये रमणीयशब्दसृष्टिः, दण्डिनः इव पदलालित्यं सुबन्धौ न विद्यते, तथापि विद्वज्जनहृदये श्लेषादिविविधालङ्कारप्रयोगेण सुबन्धोः सम्मानजनकं स्थानं विद्यते एव।

## कादम्बरी

गद्यसम्राट् महाकविबाणभट्टेन विरचित-कादम्बरी बाणस्य सर्वश्रेष्ठं गद्यकाव्यमस्ति। इयं कथाग्रन्थरूपा अस्ति। स्वयमेव कविना- 'धिया निबद्धेयमतिद्वयी कथा' इति कादम्बर्याः कथाग्रन्थत्वम् उद्घोषितम्। कादम्बर्यां निबद्धा कथा गुणाढ्यकृतायाः बृहत्कथायाः गृहीता। बृहत्कथायाः साम्प्रतम् उपलब्धिः नास्ति तथापि बाणकाले सा उपलभ्या आसीत् इति वक्तुं शक्यते। बृहत्कथातः नृपसुमनसः साधारणीं कथाम् आदाय बाणभट्टेन काव्यकलानैपुण्येन तस्यां वैशिष्ट्यमुत्पाद्य कादम्बरी विरचिता।

कादम्बर्याः कथा जन्मत्रयवृत्तान्तस्य अङ्गीकारेण जटिला जाता। एका कथा कथान्तरमुद्भावयति इति प्रथमा कथा सावशेषैव द्वितीयायाः कथायाः अवसानप्रतीक्षमाणा तिष्ठति। एवम् अपरापि कथा इति कथासाङ्कर्यम् अत्र विद्योतते।

## कथानकम्-

अस्याः कादम्बर्याः कथानकं संक्षेपतः एवम् अस्ति– 'विदिशायां शूद्रको नाम राजा आसीत्। एकदा चाण्डालकन्यका एकं पञ्जरस्थं शुकं तस्मै उपाहरत्। नृपेण गृहीतः सः शुकः तस्मै शूद्रकाय स्वपूर्वजन्मनः कथाम् आख्यातवान्। जन्मकाले एव मम माता मृता, तातः अपि लुब्धकैः मारितः। वृक्षादयः पतितं भूमौ सरन्तं मां जाबालिशिष्यान्यतमः दयया उत्थाप्य स्वगुरोः आश्रमे नीतवान्।

तत्र जाबालिः मद्वृत्तान्तम् इत्थम् अकथयत्–उज्जयिन्यां तारापीडो नाम राजा आसीत्, तस्य पत्नी विलासवती, शुकनासश्च तस्य अमात्यः। प्रौढे वयसि नृपस्य चन्द्रापीडनामकः पुत्रः जातः। अमात्यस्य शुकनासस्य सुतश्च वैशम्पायनः जातः। तौ प्राप्तवयसोः गुरुकुले शिक्षितौ। शुकनासेन राजपुत्रः चन्द्रापीडः सम्यक् उपदिष्टः। दिग्विजयप्रवृत्तः चन्द्रापीडः गन्धर्वमिथुनम् अनुधावन् एकं सरोच्छेदं दृष्टवान्। तत्र महाश्वेता नाम कापि सुन्दरी तपः प्रवृत्ता दृष्टा स्ववृत्तान्तमुक्तवती। मया पुण्डरीकनामके मुनितनये स्नेहः कृतः, सः लोकान्तरं गतः, तमनुकर्तुकानां मां कापि दिव्याङ्गना 'भूयोऽपि युवयोः सङ्गमः भावीति'

मां विबोध्य तच्छरीरं लोकान्तरम् अनैषीत्। महाश्वेतैव चन्द्रापीडाय कादम्बरीवृत्तम् उक्तवती। कादम्बरीचन्द्रपीडयोः साक्षात्कारे जाते द्वयोः अनुरागः जातः। तदैव पितुः दूते आगते चन्द्रापीडः स्वां राजधानीं प्रतिनिवृत्तः। कादम्बर्याः चन्द्रापीडविरहे देहं त्यक्तुमुद्यतायां तत्सखी पत्रलेखा तां सान्त्वयित्वा चन्द्रापीडस्य समीपमागत्य तदवस्थां तस्मै न्यवेदयत्।

एतावती कथा बाणभट्टेन लिखिता। अस्याः उत्तरार्द्धभागस्य कथा तस्य तनयेन भूषणभट्टेन पूरिता। चन्दापीडः राजधानीं गच्छन् वैशम्पायनं तदनुरोधान्महाश्वेतायाः आश्रमे एव स्थापितवान्। तत्र महाश्वेतां कामयमानः वैशम्पायनः तस्याः शापेन शुकः जातः। एवं श्रुत्वा पत्रलेखया सहागतः चन्द्रापीडः स्वप्राणान् विससर्ज। अथ कादम्बरी तदवस्थं चन्द्रापीडं दृष्ट्वा बहु अव्यथत। ततः कादम्बरीमहाश्वेते इत्थं दिव्यां वाचं श्रुत्वा तथैव तस्थतुः – 'शापवशाच्चन्द्रापीडः प्राणैर्वियुक्तः, अस्य देहं संरक्ष्यताम्, पुनरपि युवयोः युष्मद्दयिताभ्यां सह सङ्गमः भावीति।' इन्द्रायुधो नाम चन्द्रपीडस्य अश्वः तत्क्षणं तस्मिन्नेव सरसि अगाहत। तत्स्थाने पुण्डरीकस्य सखा कपिञ्जलः सरसः निर्गत्य कादम्बरी–महाश्वेते सूचितवान् यत् चन्द्रापीडः चन्द्रस्य, वैशम्पायनः पुण्डरीकस्य, इन्द्रायुधश्च कपिञ्जलस्य अवताराः आसन्।

एवं महर्षिमुखात् कथायाः श्रवणानन्तरं मम 'अहमेव प्राक् पुण्डरीकावतारः 'वैशम्पायन' इति ज्ञानम् अजायत। साम्प्रतं शापावधेः प्राप्तत्वात् शूद्रकस्य देहत्यागः कादम्बरी भुजान्तरालगतस्य चन्द्रापीडस्य सुप्तोत्थितस्येव विबोधः, पुण्डरीकस्य समागमनञ्च अजायत्। ततः चन्द्रापीडेन कादम्बरी पुण्डरीकेन च महाश्वेता परिणीता, इति कादम्बर्याः कथा।

## पात्रचित्रणम्-

कादम्बर्याः पात्रचित्रणं सम्यक् प्रकारेण सजीवतया कृतमस्ति। राजा शूद्रकः, जाबालिः, तारापीडः, महाश्वेता, कादम्बरी चेति सर्वाणि पात्राणि तथा वर्णितानि यथा तानि वाचकानां पुरः स्थितानि इव प्रतिभान्ति। एकत्र पाठकः यदि शबरसेनाप्रयाणं पठित्वा विस्मयाविष्टः भवति, जाबालेः आश्रमं दृष्ट्वा अस्ततिमिरान्तःकरणः भवति तदाऽपरत्र सः एव कादम्बर्याः महाश्वेतायाः वा वर्णनं पठित्वा लोकान्तरसमुपस्थितः इव अच्छोदसरसः वर्णनं श्रुत्वा कुतुकाकुल इव सुधासिक्तः इव भवति। एकतः यदि शुकनासोपदेशमधीत्य हृदयं निर्मलदर्पणतां नयति, तदा अपरत्र राजा अन्तःपुरवर्णनं श्रुत्वा हृदयं रञ्जयति। प्राकृतिकवस्तूनां वर्णनेऽपि कादम्बरी न कुतोऽपि हीयते।

## काव्यवैशिष्ट्यम्-

कवितायां यावत्कलापक्षस्य विभावनं तावत् अलङ्काराणां सन्निवेशः। अर्थचयने शब्दगुम्फेन च न केवलं गद्यकाव्यानि एव अपितु समस्तमपि संस्कृतवाङ्मयम् अतिशय्य वर्तते। कादम्बरी इति कथनं न अतिशयोक्तियुक्तम्-

**नवोऽर्थो जातिरग्राम्या श्लेषोऽक्लिष्टः स्फुटो रसः।**
**विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुर्लभम्।।**

इति दुर्लभत्वेन यदुक्तं तदत्र कादम्बर्याम् सुलभमिति महद्गौरवजनकम् अस्य कवेः।

अत्र तत्तदलङ्काराणां यादृशः मनोरमः प्रयोगः कृतः संस्कृतसाहित्ये तादृशः अन्यत्र दुर्लभः। उदाहरणरूपेण कतिचनोद्धरणानि प्रस्तूयन्ते, यथा-

'प्रावृषमिव घनकेशजालम्, शरदमिव विकसितपुण्डरीकलोचनम्' अत्र यादृशः तदुत्थापिता चोपमा यादृशी तदुभयं मिलित्वा स्वर्णे सुगन्धं सृजतीव। अतिशयोक्तेर्बहुलेऽपि प्रयोगे-

'अथ परिसमाप्तमीक्षणयुगलस्य द्रष्टव्यदर्शनफलम् आलोकितः खलु रमणीयानामन्तः, दृष्ट आह्लादनीयानामवधिः, वीक्षिता मनोहराणां सीमान्तलेखा, प्रत्यक्षीकृता प्रीतिजनानां परिसमाप्तिः विलोकिता दर्शनीयानामवसानभूमिः।' सुभगपदावललिगुम्फिता इयम् अतिशयोक्तिः श्रुतमात्रैव मनो मादयति।

रशनोपमायाः प्रयोगे यौवनस्य वर्णनं अत्याकर्षकम्-'क्रमेण च कृतं मे वपुषिवसन्त इव मधुमासेन, मधुमास इव नवपल्लवेन, नवपल्लव इव कुसुमेन, कुसुम इव मधुकरेण, मधुकर इव मदेन नवयौवने न पदम्।'

परिसंख्यायाः प्रयोगे अपि अयं कविः'निरन्तरश्लेषघनां सुजानिं महास्रजं चम्पकपुष्पकैरिव' रचितां कविताम् उपस्थापयति। यथा -

'यत्र वयः परिणामे द्विजपतनम्, उपवनचन्दनेषु जाड्यम्, अग्नीनां भूमिमत्त्वम् एणकानां गीतव्यसनम्, शिखण्डिनां नृत्यपक्षपातः, भुजङ्गमानां भोगः, कपीनां श्रीफलाभिलाषः मूलानामधोगतिः।'

न केवलं अलङ्काराणाम् उपस्थापने एव अपितु कवितायाः उद्देश्यस्य 'सत्यं शिवं सुन्दरम्' इति विशेषितस्य लोककल्याणस्यापि निवेशने बाणः पूर्णरूपेण जागरूकः इति कादम्बर्याः परिशीलनेन एव ज्ञायते।